भ्योऽन्यतीर्थकरेभ्यो वा पश्यत्यधिपश्यति, किंचान्यत्–'अमितं जाणति वीरे' ॥८२॥ न मितं अमितं, का तर्हि भावना?– केषांचित्सर्वज्ञवादिनां अनंतं ज्ञानं सर्वत्राप्रतिहतमिति, अथवा लोकमेव अमितं जाणंति, अमितो नाम अपरिमाणो लोकः, तच्च सर्वज्ञो वीरः तथैव जानाति, अन्ये पुनः सव्वत्थ सपरिमाणं इति, वीरोक्ति,'सर्वत्रे'ति तिर्यगूर्ध्वमधश्चेति क्षेत्रतः, कालतः केषांचिद् दिव्यं वर्षसहस्रं केषांचिदन्यथा, इति उपप्रदर्शनार्थः वीर उक्तः, अधिकं पश्यतीति, एवं यस्य परिमाणमिष्टं स तेनार्थाभिप्रेतेन परिमाणेन, नानन्तलोकमिच्छन्ति, तत्र ये ब्रुवते 'अणंते णितिए लोए' त एवं ब्रुवते–यो हि यथा भावः स तथैवात्यन्तमविकल्पो भवति, तद्यथा–यस्सस्सस एव स्थावरः स्थावर एव सर्व्वकालं, न त्रसत्वं जहाति न स्थावरत्वं जहाति, एवं देवा देवा एव, मनुष्येषु स्त्रीपुंनपुंसका इति, अथवा यदुक्तं 'लोकावादं णिसामेज्ज' ते च लोकवादा उक्ताः, अथवा स्त्री स्त्री एव, एवं त्रसस्सस एव, स्थावरः स्थावर एव, भट्टारगो भणति–मिच्छा एयं, जो जहा सो तहेव, अव्वत्तं भण्णति, अयं तु स्वभावो–'जे केइवि तसा पाणा'सिलोगो ॥८३॥'जे'त्ति अणिद्दिट्ठे णिद्देसे, केचिदिति न सर्वे, त्रसा न स्थावराः, तत्र त्रसतीति त्रसाः तिष्ठंतीति स्थावराः,'परियाए अत्थि से जायं' पर्यायो नाम पर्यायः प्रकार इत्यर्थः, अथ कोऽर्थः, अस्त्यसौ कश्चित् प्रकारः येन ते त्रसा भवन्ति स्थावरा वा, तत्र तावत् त्रसनिर्वर्त्तकानि कर्म्माण्युपचित्य त्रसा भवंति, एवं स्थावरा अपि, नागार्जुनीयास्तु पठन्ति—त्रसनामउदयेण त्रसं न तु स्थावरोदयनामेन, उक्तं च–'अणिच्चमावासमुविंति जंतवो, परलो० सोच्च समेच्च इंतयं' तथा चोक्तं 'ठाणी विविधा ठाणा०' अन्यच्चोक्तं 'अशाश्वतानि स्थानानि', यो हि यथाकर्म्मा स तथा भवतीति, तद्यथा–नारगो तिर्यग्मनुष्यो देवो वा, तथा स्त्री पुं नपुंसकं वा, न तु जातिमनुष्योऽस्ति जातिस्त्री वेत्यादि, यतश्चैवं तेनायमन्यः पर्यायो भवतीति वाक्यशेषः, येन ते त्रसा भवन्तीति

स्थावरा वा, किं चान्यत्—इहैव तावद्दासो भूत्वा राजा भवति राजा भूत्वा द्रमकः, तथा बालकौमारयौवनमध्यमस्थावियाण्यन्योपमर्देन प्राप्नोति, गतिस्थाननयनासनस्वमबोधादयोऽन्येऽपि विशेषा वक्तव्या इति, किंचान्यत्–प्रत्यक्षेण परोक्षं साध्यते, तच्चामी सच्चा 'उरालं जगतो जोगं' सिलोगो ॥ ८४ ॥ ओरालं प्रागडं स्थूलं जगतो योगो, तद्यथा—गर्भबालकौमारयौवनमध्यमस्थावियाण्योरालाणि प्रागडानि जुञ्जंति विजुञ्जंति, तथा च तस्मिन्नेव वयसि कश्चिद्दासो भूत्वा राजा भवति, ईश्वरश्च भूत्वा निर्द्धनो भवति, 'अस भुवि' विपरीततामेवैति विपर्यासः, विपर्यासेन प्रलीयन्ते, अन्यथाभावगमणेनेत्यर्थः, चशब्दान्न सर्वथा प्रलीयंते, द्रव्यतो हि अवस्थिता एव, अनेन प्रत्यक्षदृष्टेन सामान्येनानुमानेनैव साध्यन्ते, यथेह जातिस्मरणाद्वा बहवो विशेषा दृश्यन्ते एवं भवान्तरगतस्य अप्रत्यक्षाः, गतिकायेन्द्रियलिंगत्रसस्थावरराजयुवराजईश्वरादिदासभृतकद्रमकादयश्चोत्तमाद्याः विपर्यासाः, भवान्तरेष्वपि प्रत्येतव्याः, एते तु प्रत्यक्षपरोक्षाः ताँस्तान् पर्यायविशेषान् परिणमंतः **'सव्वे अकंतदुक्खा य'** सर्व्वे इत्यपरिशेषाः कान्तः प्रिय इत्यर्थः न कान्तमकान्तं दुक्खं अनिट्ठं अकामं अप्पियं जाव अमणामं दुक्खं, अनुकूलमपि चैतत् ज्ञायते, तथा सव्वे इट्ठा सुभा कंता सुभा जाव मणामा सुभा 'अत' इति अस्मात्कारणात् अहिंसगाः, एवं ज्ञात्वा सर्वसच्चान्यस्य साधोरहिंसनीयानि, किं कारणं ?, तदुच्यते–**'एवं खु णाणिणो सारं'** सिलोगो ॥ ८५ ॥ 'एतदि'ति यदुक्तमुच्यते वा सारं विद्धीति वाक्यशेषः, यत्किं ?, उच्यते, जे ण हिंसति किंचणं, किंचिदिति त्रसं स्थावरं वा, अहिंसा हि ज्ञानगतस्य फलं, तथा चाह–'योऽधीत्य शास्त्रमखिलं०' एवं खु णाणिणो सारं जं ण भासे अलियपयं, एवं अदत्तं, मेहुणं, परिग्गहं च, जं च रागादि अज्झत्थदोसे विवज्जेति तदप्युच्यते एवं खु णाणिणो सारं, स्यात्किं कारणं सच्चा न हिंसनीया ?, उच्यते–**'अहिंसा समयं चेव'** अहिंसासमयो नाम

तुल्यता, यथा मम दुक्खमप्रियं एवं सव्वसत्त्वानां, एतां अहिंसां समतामात्मनः सर्वजीवैः एतावन्तं वियाणिया न हिंसति कंचनमिति वर्त्तते, एतावांश्च ज्ञानविषयः यदुत सर्वत्र समया भाव्येति, तथा मृषाऽदत्तादानादिष्वपि आश्रवेषु यथासंभवमायोज्यमिति, उक्ता मूलगुणाः, उत्तरगुणसिद्धये व्यपदिश्यते **'वुसिए य विगतगेही आयाणं'**सिलोगो ॥८६॥'वुसिते'त्ति स्थितः, कस्मिन् ?, धर्म्मे, विगता गृद्धिरिति अलुद्धः, 'आदिरंत्येन सहिते'त्ति अक्रुद्धः अमानः अमायावी, पठ्यते अकसायी, सदाधिगतबोधी, कषायाः क्रोधाद्याः, गृद्धिर्लोभः, एगग्गहणे गहणमिति 'आदिरन्त्येन सहितेति' वा गृद्धिग्रहणात्सर्वे आकृष्टाः,**'आदाणं सारक्खए'**त्ति आत्मानं सारक्खति असंजमाओ, आदीयत इत्यादानं–ज्ञानादि, तं सारक्खति मोक्खहेतुं, किं ?–**'चरियासणसेज्जासु भत्तपाणे य अन्तसो'** सारक्खति इति वर्त्तते, चरियत्ति इरियासमिति गहिता, चरियाए पडिवक्खो आसणसयणे, एत्थ आदाणं सारक्खति, अथवा चरियागहणेण समिईओ गहिताओ, आसणसयणगहणेण कायगुत्ती, एकग्गहणेणं गहणंतिकाऊण मणवइगुत्तीओवि गहिताओ, भत्तपाणग्गहणेण एसणासमिई, एवं आदाणपरिट्ठावणीयाई सूइयाओ, 'अन्तस' इति जाव जीवितान्तः। **'एतेहिं तिहिं ठाणेहिं'** सिलोगो ॥ ८७ ॥ **'एतानी'**ति यान्युक्तानि इरिया एगं ठाणं आसणसयणंति बिइयं भत्तपाणेति तईयं, अहवा एतेसु चेव इरियाइगेसु मणोवयणकाएणं, अहवा इरियं मोत्तूण सेसेसु उग्गमउप्पायणेसणासु संजमेज्ज सया मुणी, सदा–सर्वकालं। इयाणिं एतेसु संजमंतो इमानन्यानध्यात्मदोषान् परिहरेत्, तद्यथा–**'उक्कोसं जलणं णूमं'** सिलोगो ॥ ८८ ॥ उक्कस्यतेऽनेनेति उक्कोसो–मानः, ज्वलत्यनेनेति ज्वलनः–क्रोधः, नूमं णाम अप्रकाशं माया, अज्झत्थो णाम अभिप्रेतः, स च लोभः, स एवं परसमयाः, न सद्भाव इति मत्वा सम्यग्दृष्टिज्ञानवान् यथोक्तेषु मूलोत्तरगुणेषु यतमानः **'समिते तु सदा साधू'** सिलोगो

॥ ८८ ॥ समिते तु तेषामेवोत्तरगुणानां पूर्वोक्तानां परिसमाननं क्रियते सदा–नित्यं, तुर्विशेषणे, साधयतीति साधुः, पंचासंवराः प्राणातिपाताद्याः तत्संवृतत्वान्न पापमादत्ते इति, स एवं संवृतत्वात् सितेहिं असिते भिक्खू, सिता बद्धा इत्यर्थः, गृहिकुपाषंडादिभिर्गृहकलत्रमित्रादिभिः संगैः सिताः तेषु सितेष्वसितः, अबद्ध इत्यर्थः, तैर्याच्यमानः तानाश्रितो वा अणसितः, एवं कथं?, उक्तं हि 'जणमज्झेवि वसंतो एगंतो०' आङ् मर्यादाभिविध्योः परि समंतात् आदिमध्यावसानेषु यावन्न मुच्यसे ताव आमोक्खाए परिवएज्जासित्ति बेमि शिष्योपदेशो। गतः सूत्राणुगमो, इदाणिं णया–'णायम्मि गिण्हिअव्वे०'गाथा ॥ ॥ 'सव्वेसिंपि णयाणं०' गाथा ॥ ॥ इति श्री सूत्रकृतांगे समयाख्यं प्रथमाध्ययनं समाप्तं ॥

अज्झयणाभिसंबंधो ससमयगुणे णाऊण परसमयदोसे य ससमए जयमाणो कम्मं विदालेज्जासित्ति **वेयालियज्झयणमागतं**, तस्सुवक्कमादि चत्तारि अणुयोगद्दारा, अज्झयणत्थाधिकारो कम्मं वियालियव्वंति, उद्देसत्थाधिकारो पुण **"पढमे संबोधि अणिच्चया य"** गाहा ॥ ४० ॥ पढमे उद्देसए हिताहिता संबुज्झितव्वं अणिच्चता य **'डहरे वुड्ढे य पासधा'** एवमादि, बितिए उद्देसए **'माणवज्जणता'** माणो वज्जेयव्वो,'जे यावि अणायए सिदा' एवमादि,"उद्देसम्मि ततिए"गाहा॥४१॥ततिए मिच्छत्तादिचितस्स कम्मस्स अवचयो **'संवुडकम्मस्स भिक्खुणो'** एवमादि, णामणिप्फण्णे णिक्खेवे वेयालियंति तत्थ गाथा ॥ **वेयालियंमि वेयालगो य वेयालयं वियालणियं। तिण्णिवि चउक्कगाइं वियालगो एत्थ पुण जीवो** ॥३६॥ तत्थ वेतालिगो णामादि चतुर्विधो, णामठवणाओ तहेव, दव्ववेयालगो जो हि जं दव्वं वेयालियंति रथकारादिः, भावे णोआगमतो भाववियालगो साधुः, जीवो कम्मं विदालयति कम्मं वा जीवं, विदालणंपि णामादि चतुर्विधं, तत्थ गाथा **"दव्वं च परसुमादी"** गाथा ॥३७॥ विदा-

लणमिति करणभूतं, तत्र द्रव्ये परश्वादि, ज्ञानाद्यात्मकेन भावेन भाव एव मिथ्यात्वादिरूपो विदार्यते, भावे विदारणं णाणदंसण-चरित्ताणि, विदालणियंपि नामादि चतुर्विधं, णामठवणाओ तहेव, दव्वविदालणियं दारुगं, भावे अट्ठविहं कम्मं विदारिज्जति, वेयालियस्स गाथाए णिरुत्तं भण्णति-"वेयालियं इहं देसियंति वेयालियं ततो होति।"एतदेव करणभूतं वेयालियकमध्ययनं, किं विदारयति?,तदेव कर्म्म,आह–यद्येवं सर्वाणि कर्म्मविदालणानि,विशेषो वा वक्तव्यः,उच्यते,अयं विशेषो-"वेयालियं इहं वित्त-मत्थि तेणेव य णिवद्धं"॥३८॥ वेतालियं नाम वृत्तजाति तया वा बद्धत्वात् वैतालियं। अस्योपोद्घातः"कामं तु सासतमिणं कथितं अट्ठावयम्मि उसभेण। अट्ठाणउतिसुताणं सोऊण य तेऽवि पव्वइया ॥ ३९ ॥" भरहेण भरहवासं णिज्जिऊण अट्ठाणऊतीवि भायरो भणिता–ममं ओलग्गघ रज्जाणि वा मुयधत्ति, अट्ठावए भगवन् उसभसामी पुच्छितो, एवं भरहो भणति, किमेत्थ अम्हेहिं करणी-यंति?, ततो भगवता तेसिं अंगारदाहगदिट्ठंतं भणिऊण इदमध्ययनं कथितं, यद्यपि चेदमध्ययनं शास्त्रतं तथापि तेन भगवता पुत्राः संबोधिताः इतिकृत्वा स एव विशेषस्तीर्थकरैरप्यस्य उपोदघातेऽनुवर्त्तते स्म इति। एवं उवग्घातणिज्जुत्तीए 'उद्देसे निद्देसे य णिग्गमे'त्ति अक्खाणगं समोतारेयव्वं, स भगवान् तान् तत्संसारविमुमुक्षुराह–भो! 'संबुज्झह किण्ण बुज्झह' वुत्तं, (८९) सम्यक् संगतं समस्तं वा बुध्यत संबुज्झह, स्यात् कहिं बुध्यते?, धर्म्मे, किमिति परिप्रश्ने, स्यात्किं कारणं बुध्यते?, संबोधी खलु पेच्च दुल्लभा, संबोधिस्त्रिविधा–णाणदंसणचरित्ताणि, खलु विशेषणे, चारित्रसंबोधिरधित्रियते मनुष्यत्वे, न शेषगतिष्विति, अथवा बुज्झह, किं रज्जेहिं विसएहिं कलत्तेहिं वा करेस्सह?, प्रसुप्तस्य संबोधिर्भवतीत्यतः सुप्ता एव वक्तव्याः, एत्थ णिज्जुत्तीगाथा-दव्वे णिद्दावेए दरिसणणाणतवसंजमा भावो। अधिकारो पुण भणितो णाणे तह दंसणचरित्ते॥४२॥सुत्तो दुविहो–दव्वसुत्तो

भावसुत्तो य, तत्थ दव्वसुत्तो दुविहो–उवचारसुत्तो णिद्दासुत्तो य, उपचारसुप्तः पतित ओदकः, निद्रासुत्तो नाम निद्रावेदोदयाविष्टः स्वपिती, पञ्चानामपि विषयाणां तत्कालमावन्नो, भावसुप्तस्तु ज्ञानादिविरहितः अज्ञानी मिथ्यादृष्टिरचारित्री च, जो दव्वसुत्तो सो भावओऽवि भतिओ, एवं जागरिओवि, द्रव्यजागरिता भावसुप्तेन चाधिकारः। स्यात् कथं संबोधि दुल्लभा ?, उच्यते,'माणुस्स देसकुलकाला' गाथा ॥ इतश्च संबोद्धव्यं धर्म्मे यस्मात् 'णो हूवणमंति रातिओ णो सुलभं पुणरावि जीवियं,' नह्यतिक्रान्तरात्रयः पुनरुपनमंते, कथं ?, न हि बालरात्रयो यौवनरात्रयो वाऽतिक्रम्य पुनरुपनमंते, का तर्हि भावना ?, न वृद्धो भूत्वा पुनरुत्तानशायी क्षीराहारो बालको भवति, नवा शिल्पककलाग्रहणसमर्थः कुमारको रक्तगंडमंसु भवति, नवाभिनवश्मश्रुभूषिताधरोष्ठकपोलः कामभोगोल्वणमना युवा भवति, अत्रोदाहरणं लौकिकं, नन्दः किल मृत्युदूतैराकृष्ट आह–कोटीमहं दद्यां यद्येकाहं जीवेत्, तथापि न लब्धवान्, इत्यतः णो सुलभं पुणरावि जीवितं, जहण्णेणं अंतोमुहुत्ताऊहि उक्कोसेणं पुव्वकोडीआयुगेहि अहियारे ऊहिए एत्थंतरे कस्सइ उपक्कमो होज्ज, तं पुण जिण्णं ण सक्कति पुणो वड्ढावेतुं, सदोपक्रमोऽनियतो, तद्यथा "डहरा वुड्ढा य पासधा गब्भत्था य चयंती माणवा" (९०) मनोरपत्यानि मानवाः, मानवग्रहणेन मनुष्याणां कथ्यते, अथवा सर्व एव मानवाः अपदिश्यंते, 'सेणे जह वट्टयं हरे' 'यथे'ति येन प्रकारेण, वट्टगा नाम तित्तिरजातित ईषदधिकप्रमाणा उक्ता वार्तकाः, एवमवधारणायां, आयुषः क्षयः आयुःक्षयः, स तु उपक्रमादन्यथा वा 'तुट्टइ'त्ति त्रुट्यते जीवः शरीरात् वा शरीरं जीवात् अथ मनुष्यजीवितात्तुट्यति स्वजनादिभिर्वा, योऽपि नाम कश्चित्स्वजनप्रमत्तो न बुध्यते यथा मातापितरौ मे वृद्धौ, ताभ्यां मृताभ्यां धर्म्मं करिष्यामीति, एतदप्यकारणं, कथं ?, तर्हि उच्यते–'माताहि पियाहि लुप्प' वृत्तं (९१) मातृभ्य इति सर्वमातृग्रामो

गृह्यते, पितृभ्य इति पितृग्रामः, लुप्यत इति छिद्यते तेषु जीवात्, स्वयं कदाचित् पूर्वतरं म्रियते, न च सैव माताऽन्यत्रापि भवति पिता वा, अथैकेन्द्रियादिषु प्रक्षिप्तः नैव मातापितृसंबंधं लभते, न वा सुगतिः प्रेत्य सुलभा भवति, सुगतिर्नाम सुकुलं, प्रेत्य योनिस्थितिरेव, नागार्जुनीयास्तु पठंति 'माता पितरो य भायरो विलमेज्जसु केण पच्चए' नारकदेवैकेन्द्रियासंज्ञिषु च, यतश्चैवं तेण एताणि भयाणि वेहिया एतानि यान्युक्तानि–णो हूवणमंति राइओ, पेक्खिया–देहिया पस्सिया, आरंभो नाम असंयमः अनुक्तमपि ज्ञायते, परिग्रहाच्च, कथं ?, आरंभपूर्वको परीग्रहः, स च निरारंभस्य न भवती ततः आरंभग्रहणं, स्यादारंभादनिवृत्तस्य को दोषः ?, उच्यते, 'जमिणं जगति पुढो जगा' वृत्तं ॥ ९२ ॥ 'यदि'ति यस्मात्कारणात् अस्मिन् जगति, पुढो नाम पृथक्, कम्मेहिंति यथाकर्म्मभिः लुप्यंति नरकादिषु विविधैर्दुःखैर्लुप्यते, सर्वसुखस्थानेभ्यश्च्यवंते, किंच–'सयमेव कडे भि(व)गाहतु' ण इसरादिकतं एव, येन यथा कर्म्म कृतं असंबंधिदोषात् अष्टप्रकारं आत्मनि अवगाहति, आत्मा कर्म्मसु वा, अकारलोपं कृत्वा तमेव अवगाहति 'णो तेण मुच्चेज्ज अपुट्ठवं' नासौ तेण–कर्म्मणा मुच्यतेऽस्पृष्टमस्यास्तीति, आह हि 'पावाणं च भो ! कडाणं कम्माणं' किंच-न केवलमिहानित्यता भवति, अन्यत्रापि एषा भवत्येव, तथा 'देवा गंधव्वरक्खसा असुरा' वृत्तं (९३) अथवा मा भूत्कश्चिदेवसुखेषु संगं करिष्यतीत्यतस्तदनित्यताज्ञापनार्थं अपदिश्यते 'देवा गंधव्वरक्खसा' देवग्गहणात् वाणमंतरभेदो, असुराणां प्रतिपक्षः, सुरा वैमानिकाः, भूमिगता असुरा एव, अथवा भूमिगता भूमिजीवा एव, अथवा भूमिगताः सरिसृपा गह्यन्ते, इहापि च 'राया णर सेट्ठि माहणा' राजानः-चक्रवर्त्त्याद्याः नरा-पृथग्जनाः सेट्ठिणो-णेगमाद्या, अधिपास्तु अधिकं पांतीत्यधिपाः, ते तु मंत्रिमहामंत्रिगणकदौवारिकादयः, माहनग्रहणात् जातिभेदः, त एते सर्व्व एव स्वस्थानेभ्यश्च्यवंते, दुःखिता नाम, नत्रा स्यात्कस्यचिन्मरणमिष्टं, उक्तं

च 'मरणमिति महद्भयं' तदपि च कालवशेन किं ?, येऽपि कामनिमित्तेनोद्यमंते तान् प्रत्युपदेशः, 'कामेहि य संथवेहि य' वृत्तं(९४) एत्थ इच्छाकामा अप्पसत्थिच्छाकामा मयणकामा य, अविशिष्टा वा शब्दादयः, कामोपग्रहाश्च स्त्र्यादयः संस्तुता वर्त्तन्ते, अथवा संस्तुता इति पूर्वापरसंस्तवो गृह्यते, स एवं तेभ्यः कामेभ्यः संस्तवेभ्यश्च 'कम्मसहि'त्ति कर्म्मभिः सह तुल्यतीति, कोऽर्थः ?, न ते कामाः संस्तुताश्चैनं गच्छंतमनुयास्यंति, 'कालेने'ति सोपक्रमेणान्यतरेण वा, जायंत इति जन्तवः, 'ताले जह बंधणच्चुतो' ताले जातं तालं, तालं हि गुरुत्वाद् दूरपाताच्च शीघ्रं पततीत्यतस्तद्ग्रहणं, तालस्यापि द्विधा पातः–उपक्रमात् कालेन च, एवं आउक्खएवि तुट्टति जीवोऽपि सोपक्रमेणान्यथा वा, किंच–न केवलं कामेषु संस्तुतेषु च सत्त्वा गृहिणस्तावत् पढंति, अन्येऽपि हि तथैव, तंजहा— 'जे यावि भवे बहुस्सुता धम्मिय माहण भिक्खुए' ॥८५॥ बहुस्सुया धर्म्मे नियुक्तो धार्मिकः, बृहन्मना ब्राह्मणः, भिक्खणसीलो भिक्खू, सुचिरिति यथावत्स्वधर्म्मव्यवस्थितः, परिव्राजको वा, 'अभिनूमकरेहि मुच्छिया' नूमं नाम कर्म माया वा, अभिमुखं नूमीकुर्वन्तीति अभिनूमकरा–विषयास्तेषु मूर्च्छिता–गृद्धा, लोभो गृहीतः, एगग्गहणे गहणंति सेसकसायावि गहिता, कथं तं नेच्छंति ?, पत्थंति पत्थिअंति वा अण्णेहिं तेहिं आहारादिसु कामेसु सत्ताः, इह च परत्र च तीव्रमेव तदुपचितैः कर्म्मभिः कृत्यन्ते कामजनितैरित्यर्थः, स्यात्–कथं ते कर्म्मभिरेव कृत्यन्ते न निर्वान्त ?, उच्यते, 'अथ पास विवेगमुट्ठिते' वृत्तं ॥ ९६ ॥ 'अथे'ति प्रकृतिअपेक्षं, अथवा कर्म्मविवागो यत्र, किं न पश्यसि विवेगमुट्ठिते ?, विवेगो नाम स्वजनगृहादिभ्यः प्रव्रज्यास्थानमन्यतरं, अथवा कर्म्मविवागो यत्र स्थिताः कर्म्मनिर्वाणायेत्यर्थः, विविधं तीर्णा वितीर्णा न वितीर्णा अवितीर्णा न कामभोगाभावतीर्णा, 'इह' अस्मिँल्लोके, अथवा इहेति पूरणार्थः, धुतं णाम येण कर्म्माणि विधूयन्ते, वैराग्य इत्यर्थः, चारित्रमपि, केचिद्भणंति–

वयं स्वतः विरता, विरताः अपापकर्म्माणः, अथवा अपि संभावने, तीर्णा अपि गृहादिसंग्रंथं केवलं भाषंते, न तु कुर्वन्ति, स एवं भाषमाणः पाखंडी पाखंडगणो वा, अणेगेसु च एकादेशो भवत्येव 'णाहिसि आरं कतो परं' ज्ञास्यति आरं–गृहस्थत्वं परं–प्रव्रज्या, किमुक्तं भवति–न त्वं जानीषे, कैः–किर्म्मभिः गृही भवति प्रव्रजितो वा, अजानन् कथं कुशलानि वेत्स्यसि ?, अथवा आरमित्ययं लोकः परस्तु परलोकः, अयं सौत्रोऽर्थः–आरः–संसारः परो–मोक्षः, तदिति आरं पारं वा न ज्ञास्यति, कुतः?–कुमार्गाश्रयात्, अथवा 'ण णाहिसि' त्ति न जानिष्यसि मोक्षमात्मानं परं वा, तत्रात्मा आरं परं पर एव, अथवा णाहिसि गिही ण पव्वइओ, आरो पव्वइओ, आरो गृही परः प्रव्रजितः, वेहासं नाम अंतरालं, न गृहित्वे नापि श्रामण्ये, अंतराले वर्त्तते, ते हि आहारादिषु सक्ता इह परत्र च तीव्रमेव तदुपचितैः कर्म्मभिः कृत्यन्ते, कामजनितैरित्यर्थः, आह–एते तावदवितीर्णत्वात् मा भवन्निर्वाणाय, अथ ये इमे उद्दंडिकाः चूर्णिकादयश्च एते कथ न तन्निर्वाणाय ?, उच्यते, "जइवि णिगिणे किसे चरे" वृत्तं ॥९७॥ यदित्यभ्युपगमे णिगिणो नाम नग्नः, कृशस्तपोभिर्निष्टप्तत्वाद् आतापनादिभिः, मासो संख्यातप्रतिभाग इतिकृत्वा मासस्य अंते सकृद्भुक्तं इति मासान्तशः 'चउत्थछट्ठट्ठमदसमदुवालसमेहिं' स एवं निष्टप्तशरीरोवि 'जे इह मायादि मिज्जति' अणिद्दिट्ठणिद्देसा माया आदिर्येषां कषायाणां, आदीयत इत्यादिः, माङ् माने, कथं ?, मीयते, पूर्यत इत्यर्थः, मायादीनां कषायाणां योजनं, अथवा मीयत इति–यथा धान्यस्य कुडो मीयते एवं मायादिभिः कषायैः स मीयते, पूर्यत इत्यर्थः, स एवं कषायाणामाकंठं मितः मरणमितो 'आगंता गब्भादणंतसो' आगमिष्यतीति आगंता, गर्भः आदिर्यस्य संसारक्रमस्य भवति स गर्भादिः, तद्यथा–गर्भप्रसवबाल्यकौमारयौवनमध्यमस्थाविर्यमरणनरकदुःखान्त इति, उत्तीर्णस्य च नरकात् स एव ध्रुवः, पुनः स एव क्रम इति,

यतश्चैवं मिथ्यादर्शनोपहतं तपोपि न दुर्गतिनिवारकमित्यतो मद्दर्शितमार्गमास्थाय "**पुरुसोरम पावकामुणा**" वृत्तं ॥ ९८ ॥ पुरि शयनात् पुरुषः, हे पुरुष! पुरुषा वा उपेत्य उवरम–उपरम पावानि–प्राणातिपातादीनि मिच्छादंसणसल्लंताणि अट्ठारस ठाणाणि, स्यात् कामभोगजीवितनिमित्तं नोपरमसि इत्यतोऽपदिश्यते 'पलियंतं मणुयाण जीवितं' परि–समंतात् आदियति जीवितस्य परं वर्षशतं, अथवा प्रलीयं–कर्म्म यावदायुर्निर्वर्त्तिं तत्परिक्षयान्तं, अथवा यस्यान्तोऽस्ति तत्प्राप्तमेव वेदितव्यमिति, आह हि दूरस्थमपि भावित्वात् आगतमेव, तथा उदधीन्यपि दिव्युषितो, जे पुण असंजमजीवितेण कलत्रादीपंकावसन्ना 'इह' मनुष्यलोके शब्दादिविषयेषु 'मूर्च्छिता' अध्युपपन्ना '**मोहं जंति नरा असंवुडा**' मोहो नाम कर्म्म तं जंति, मोहतश्च गर्भजन्ममरणादिः स एव संसारक्रमः, असंवुडा हिंसादिएहिं इंदिएहिं वा, यतश्चैवं तेन '**जयतं विहराहि जोगवं**' वृत्तं ॥९९॥ जययं नाम गामे एगराईयं नगरे पंचराइयं यत्नतः, योगो नाम संयम एव, योगो यस्यास्तीति स भवति योगवान्, जोगा वा जस्स वसे वट्टंति स भवति योगवान्, णाणादीया, अथवा योगवानिति समितिगुप्तिषु नित्योपयुक्तः, स्वाधीनयोग इत्यर्थः, यो हि अन्यत् करोति अन्यत्र चोपयुक्तः स हि तत्प्रवृत्तयोगं प्रति अयोगवानेव भवति, लोगेऽपि च वक्तारो भवंति–विमना अहं, तेन मया नोपलक्षितमित्यतः स्वाधीनयोग एव योगवान्, स्यात्-किमर्थं नित्योपयोगः?, उच्यते,'**अणुपाणा पंथा दुरुत्तरा**'अणवः प्राणा येषु ते इमे भवंति अणुपाणा–सूक्ष्माः, यदुक्तं भवति तानविराधयद्भिः, दुःखेन उत्तीर्यन्त इति दुरुत्तराः, अतः अणुपत्थि पाणा अणुपत्थि बीयहरितादि,'**अणुसासणमेव परक्कमे**' अनुशास्यतेऽनेनेत्यनुशासनं–सूत्रं तद्यथा सूत्रोपदेशेनानुशास्यते यच्चाचार्यैस्तदन्तरा अननुशासनमेव पराक्रमेः–भृशं क्रमेः, स्यात्केनेदमनुशासनं?, उच्यते, '**वीरेहिं सम्मं पवेदितं**' नित्यमात्मनि–गुरु-

पुरुषेषु च बहुवचनं, तेन वीरेहिं, सम्मं पवेदितं, अथवा सर्व एवार्हन्तो वीरास्तै प्रवेदितं, स्यादेतत्, के वीरा इति ?, उच्यते, **'वीरा विरता हु पावका'** वृत्तं ॥१००॥ यो विरतः स वीरः, कुतो ?, पापात्, अथवा विराजमानाः विदालयंतीति वा वीराः—सम्यगुत्थिताः संजमसमुट्ठाणेणं, स्यात्किं पापकं यतस्ते विरताः ?, उच्यते, 'कोधकातरियादीपीसणा' कातरिया णाम माया, क्रोधग्गहणात्मानोऽपि गृहीतः, कातरियाग्रहणाल्लोभः, पीषणा णाम क्रोधकातरिकादयः कषायाः किं पीषयंति ? ज्ञानदर्शनचारित्राणि, अथवा त एव वीराः पीषणा, पीसणा दव्वे भावे य, दव्वे कुंकुमादि पसत्थदव्वपीसणा, वप्पादि अप्पसत्थपीसणा, भावे पसत्थभावपीसणा य अप्पसत्थभावपीसणा य, अपसत्थभावपीसणेहिं अहिकारो, त एवं पीसणा **'पाणे ण हणंति सव्वसो'** सव्वसो नाम सव्वप्पकारेण योगत्रिककरणत्रिकेण, पापं नाम कर्म्म, येन च हिंसादिकर्म्मणा तत्पापं बध्यते तस्मिन् कारणे कार्योपचारं कृत्वाऽपदीश्यते **'पापाओ विरताभिणिव्वुडा'** अभिमुखं णिव्वुडा अभिणिव्वुडा अभिप्रसन्नाः, यथोष्णमुदकं सीतं भूतं णिव्वुडमित्यपदिश्यते एवं, अथवा कषायोपशमाच्छीतीभूता अभिनिव्वुडा वुच्चंति, स्यात् तस्याभिनिर्वृत्तात्मनः साधोः परीषहोपसर्गाः प्रादुर्भवेयुः, ततस्तेन इदमालंबनं कृत्वा अहियासेतव्वं **'णवि ता अहमेव लुप्पए'** वृत्ते ॥ १०१ ॥ नाहमेक एव शीतोष्णदंशमशकादिभिः परीषहोपसर्गैर्लुप्येत्ति, अन्नेऽवि असंयता पुत्रदारभरणादिभिः क्लेशैर्लुप्यन्ते, तथा च चौरपारदारिकादयः पराधीना लुप्यन्ते, अनपराधिनोऽपि कर्षकादयः करभरविष्टयादिभिरुपक्लेशैर्लुप्यन्ते, **'एवं सहिते'** एवम्—अनेन प्रकारेण, सहिते णाणादीहिं, आत्मनो वा हितः सहितः, अधिकं पृथग्जनान् पश्यति अधिपश्यति, अनिहो नाम परीषहोपसर्गैर्न निहन्यते, तवसंजमेसु वा संतपरक्कमं ण णिहेति, ' से ' इति णिद्देशे स एव भिक्षुः, कथंचित्परीषहोपसर्गैः स्पृश्यते ततः सो पुट्ठोऽधिया-

सए, अकारलोपो द्रव्यः, स एवं परीषहसहिष्णुः "धुणिया कुलियं च लेववं" वृत्तं ॥१०२॥ धुणिया णाम धुणेज्जा कम्मं, कथं ?, जहा करणकुड्डं उभयोपासे लित्तं चिरेण कालेण जुण्णलेवं, सततं लिप्पंते व जोगं वा लेईमं, उपमाने वति,'कसए'त्ति कृशं कुर्यात्, दिह्यत इति देहः यथा कुड्डं लकुटादिभिः प्रहारैः लेपापगमात् कृशीभवति एवं साधुरनशनादिभिः तपोविशेषैः कृशं देहं कुणंति, देहे च सम्यक्तपोभिरेवं कृश्यमाणे कर्म्मदेहोऽप्यपकृश्यते एव, द्रव्यकर्षणा कुड्डे शरीरे वा, भावकर्षणा रागद्वेषौ कर्षयति, त एवं अनशनादितपोयुक्ताः रागद्वेषापकृष्टाः 'अविहिंसामेव पव्वए' न विहिंसा २ अतस्तामविहिंसां पव्वए, कथमहिंसकः स्यादिति,'अनुधर्म्मो' अनु पश्चाद्भावे यथाऽन्यैस्तीर्थकरैस्तथा वर्द्धमानेनापि मुनिना प्रवेदितं, अनुधर्म्मः-सूक्ष्मो वा धर्म्मः, पुष्पवत् वृत्तं, अप्पसत्थभावधुणणं, तंमि विधुए कम्मरयो विधुत एव भवति, स्यात्-कथं धूयते ?, 'सउणी उ जह पंसुगुंडिता' वृत्तं ॥ १०३ ॥ सउणि-काउच्छी, धूलीए वा लेट्टितुं तद्रजः पक्षातो धुन्वति-ध्वंसयति सितं-बद्धं, रंजयतीति रजः, एषो दृष्टान्तः 'एवं दविओवधाणवं' दविओ रागदोसरहितो, द्रव्यमात्रमेव, उव० उपदधातीति उपधानं तदस्यास्तीत्युपधानवान्, कर्म्म क्षपति, 'तवस्सि माहणो' समणेत्ति वा माहणेत्ति वा, अथ तं कश्चित् "उट्ठितमणगारमेसणं" वृत्तं ॥१०४॥ उट्ठितो णाम धर्मे प्रव्रज्यायां, नास्यागारं विद्यते अनगारः, अनगारत्वमेषति, अथवा मोक्षमेव एषति, समणाणं ठाणे ठितं चरित्ते णाणादिसु वा, तपःस्थितं तपस्सियं, बारसविहे तवे, तमेवं धम्मे दृढप्रतिज्ञं "डहरा वुड्ढा य पत्थए" डहरित्ति पुत्तनत्तुआदयः, तेसु विसेसतो णेहो भवति, कालुणियं कारंतेसु वड्ढमाइपितिमातुलपितृव्यादयः 'पत्थए'त्ति उप्पव्वातुं इच्छति, ते आजम्मएण ठिता तण्हाए छुहाए य अवि सुस्से ण तं लभेऊण, अवि मरेज्ज णवि उप्पव्वावेतुं सक्केंति, जनानामधर्मव्यवस्थितत्वाज्जनवत्स तान् पश्यति,

न तु स्वजनवत्, "जइ कालुणियाइं से कए" वृत्तं ॥१०५॥ कालुणिया णाम 'णाह ! पिय ! कंत ! सामिय ! उद्दंसण णिप्पण्ण भुवणंमि । सव्वं सुण्णं पणइणि पुत्ता ते पितु वियोगवेलप्पा ॥१॥' सण्णा गामो गोट्ठी गणो व तं जत्थ होसि सण्णिहितो । दिप्पति सिरीए सुपुरिस ! किं पुण णियगं घरद्दारं ? ॥ २ ॥ पुत्रकारणाद् एकमवि ताव कुलतंतुवर्द्धनं पितृपिंडदं धनगोप्तारं च जनयस्व पुत्रं, ततो यास्यसि, एवं कलुणाणि रुदंता 'दवियं'ति दविओ–रागदोसरहिओ, भिक्खणशीलो भिक्खू, सम्यगुत्थितं समुट्ठितं संजमुट्ठाणेण समुट्ठितं 'णो लब्भति णं'ति ण सक्केति 'सण्णवेत्तए'त्ति आणेतुं 'जइ णं कामेहि भा(ला)विया' वृत्तं ॥१०६॥ यदीत्यभ्युपगमे, कामा–सद्दादि धणाइ वा 'लाविय'त्ति णिमंतणा, जइ कामेहिं धणेण वा बहुप्पगारं उवणिमंतेज्ज बंधित्ता वा घर आणेज्ज 'तं जीवितणावकंखिणं' तमिति–तं साधुं जीवितं–असंजमजीवितं नावकांक्षति नावकांक्षिणं 'णो लब्भंति ण सण्णवित्तए' नोकारः प्रतिषेधे. लब्भतित्ति ण ते लभंते सण्णवेत्तए, किंच–'सेहंति अ णं ममाइणो' वृत्तं ॥१०७॥ असंजमं ममायंतित्ति ममायिनः ते मातिपितिस्नुषपतिभायारो 'सेहंते'त्ति सेहावेन्ति, कथं सेहावेंति ?–'पोसाहि ण पासओ तुम' तुमं अतीव पासओ जं अतीव पस्ससि, भोगनिरिक्खितो भवान्, जतो एक एवात्मा पायभीरु पासएत्ति प्रवचनवयणेणं, कहं अम्हेहिं दुक्खिताणि ण पासतित्ति, यदि त्वं एवं दीर्घदर्शी परलोगंपि जहाहि उत्तमंति, इमो ताव त्विमो लोगो जदो, अम्हेहि य तुज्झ निमित्तेण अद्वितीए किलिस्समाणेहिं अम्ह य वुड्ढत्तणे सुस्सुसाए अकीरमाणीए पुत्तदारे य अभरिज्जमाणे य परलोगोवि ते ण भविस्सति, उक्तं च–'या गतिः क्लेशदग्धानां, गृहेषु गृहमेधिनाम् । पुत्रदारं भरंतानां, तां गतिं व्रज पुत्रक ! ॥ १ ॥' उत्तमो नाम तव एव मातापितृसुश्रूषया उत्तमो लोको भविष्यति, अन्यथा त्वधमः, एवं तैरुपसर्गैः क्रियमाणैः किंचिदेवं धर्म्मकातरः 'अण्णे

अण्णेहिं मुच्छिता' वृत्तं ॥१०८॥ अन्योऽन्येषु मूर्च्छिताः, तद्यथा–कश्चिद्भार्यायां कश्चित्पुत्रे कश्चिन्मातरि पितरि वा 'मोहं जंति णरा असंवुडा' मुह्यते येन स मोहः-कर्म्म अज्ञानं वा तत्कृतो वा नानायोनिगहनः संसारः, अथवा स्वजनस्नेहमोहिताः कृत्याकृत्ये न जानंति, न संवृताः असंवृताः–इन्द्रियनोइन्द्रियतः संवररहिता 'विसमं विसमेहि गाहिया' विसमो णाम असंजमो तमसंजमं असंयतैरेव ग्राहिता, 'ते पावेहि पुणो व गब्भिता' पापानि–छेदनभेदनविशसनमारणादीनि प्राणिवधादीनि वा तेषु पापेषु वर्त्तमाना पुनरपि गर्भीभूया उन्मार्गमाचरंतो न लज्जंते, पुराणश्मशानचिंतकमांसखादनपिशाचहस्तावसारणं, अहं संसारस्स ण वीभेमि, कुतस्तर्हि ?, तव यतश्चैवं 'दविए व समिक्ख पंडिते' वृत्तं ॥ १०९ ॥ दधिक उक्तः एवम्–अनेन प्रकारेण योऽयमुक्तः सम्यक् ईक्ष्य समीक्ष्य पापं–हिंसादि, अन्यथा पाठस्तु 'तम्हा दविइक्ख पंडिते' तस्मादेवं ज्ञात्वा विरताणं अविरताणं च गुणदोसे पावाओ विरता अट्ठारसट्ठाणाओ सयणाओ व विरतो भवाहि,'अभिणिव्वुडो' असंजमउण्हाओ सीतीभूतो 'पणता वीरा महाविधिं' भृशं नताः प्रणताः प्रणंतार इत्यर्थः, कतरं ?, जो हेट्ठा संबोहणमग्गो भणितो, वीराः उक्ताः, वीही नाम मार्गो चक्रवीथिवत् महती वीही महावीही, अथवा भाववीही एव महावीधी, तत्र द्रव्यवीधी नगरगामादिपंथाः भाववीधी तु सिद्धिपंथाः 'णेआउअं' शिवं, पाठविशेषस्तु 'प्रणता वीधीमेतमणुत्तरं,' एतदिति भाववीधीं जं भणिहामि अणुत्तरं–असरिसं अणुत्तरं वा ठाणणाणादि, सेहनं सिद्धिः, पद्यत इति पंथाः, नयतीति नैयायिकः, शिवं निरोगं, धुवं वा धुवो सासओ स एवं प्रणतः 'वेयालियमग्गमागतो' वुत्तं ॥११०॥ वैतालिकमुक्तं, अथवा विदालयतीति वैदालिकः-भगवानेव–वैतालिकस्य मार्गः वैतालिकमार्गः तं आगतः, प्राप्त इत्यर्थः,'मणसा वयसा कायेण संवुडे'त्ति गुत्तो 'चिच्चा वित्तं च णातयो' चिच्चा णाम त्यक्त्वा वित्तं बाह्यमभ्यंतरं

च, बाह्यं गोमहिष्यादि अभ्यन्तरं हिरण्णसुवण्णादि, अथवा अभ्यन्तरं विद्याबुद्धिकौशल्यादि, शेषं बाह्यं, 'णातय'त्ति पुव्वावरसंस्तुता, आरंभस्तु पचनछेदनादि प्राणातिपातो वा चशब्दात् शेषा अवयवा अपि, चिच्चा अपि वर्त्तते, संवुडे इंदिएहिं, चरेदिति अनुमतार्थे, अथवा परिव्वइज्जासित्तिवेमि ॥ **वेयालिए पढमो उद्देसओ सम्मत्तो २–१॥**

उद्देसत्थाहिगारो माणो वज्जेतव्वो, तत्थ गाथा–**तवसंजमणाणेसुवि जइ माणो वज्जिओ महेसीहिं। अत्तसमुक्कसणट्ठा किं पुण हीलामणु अण्णेसिं ?॥४३॥** महातवस्सिणा-संजमे अतीव अप्पमत्तेणं अतीव बहुस्सुतेण जइ ताव माणो वज्जिओ तेन तपस्वित्वे अप्रमत्तत्वे बहुश्रुतत्वे वा गव्वं न याति, किमंग पुण नातिकृत्स्नतपोयुक्तेन प्रमादवता अल्पश्रुतेन वा गव्वो कायव्वो ? परो वा हीलेतव्वो ?, किंचान्यत्-**'जइ ताव णिज्जरमतो पडिसिद्धो अट्ठमाणमहणेहिं। अवसेस मयट्ठाणा परिहरियव्वा पयत्तेणं ॥४४॥** भणिओ य उद्देसत्थाहियारो, सुत्ताभिसंबंधो पुण उक्तं प्रथमस्यान्ते–चिच्चा वित्तं च णातयो, एवं वित्तं स्वजनारंभं विहाय तपसि स्थितत्वात् **'तयसं व जहाड से रयं'**वुत्तं ॥१११॥ तया णाम कंचुओ, स्वमित्यात्मीयां, उपमाने वति उरगवत्, 'स' इति स पूर्वविवक्षितः साधुः, रज्यत इति रजः, तत्केन जहाति ?–अकषायत्वेनेति वाक्यशेषः, अकषायस्य हि सर्प्पत्वगिव च हीयति रजः, **'इति संखाय मुणी ण मज्जए'** इति–उपप्रदर्शने 'एवं संखाए'त्ति एवं परिगणेत्ता, एवं ज्ञात्वेत्यर्थः, 'ण मज्जए'त्ति न मदं कुर्यात्, तत्केन मज्जते ? **'गोयण्णयरेण जे विए'** गोत्रं नाम जातिः कुलं च गृह्यते, अन्यतरग्रहणात् क्षत्रियः ब्राह्मणः इत्यादि, अथवा अन्यतरग्रहणात् शेषाण्यपि मदस्थानानि गृहीतानि भवंति, इखिणी णाम खिंसणा णिंदणा हीलणा, अन्ये ब्रुवते रिक्तता, अथवा गोतण्णतरेण माहणे–साधू, अहिंसगो सुन्दरो अण्णे असोभणा, स्यात् य एषा मदानां एकेन नैकैर्वा मदस्थानैर्मत्तः परं परिभवति

तस्य को दोषः ?, उच्यते—'**जो परिभवति परं जनं**' वृत्तं ॥ ११२ ॥ परो नाम आत्मव्यतिरिक्तः सपक्षः परपक्षो वा, अथवा परः—अस्वजनः, परिभवो नाम जात्यादिश्रेष्ठस्त्वं हीनजातिरिति, एवं कुलादिषु, नान्यत्रापि, सो अणादीए यपज्जंते अणवदग्गे '**संसारे परियट्टति चिरं**' सर्वतो वर्त्तते परिवर्त्तते, 'चिर' मिति अणंतकालं, विसेसेण कुत्थिता सुकुत्थिता तासु जातिसु एगिंदियवेइंदियादिसु, यतश्चैवं तेन '**अदु इंखिणिया तु पाविया**' अदु इति यदुक्तकारणात् इंखिणिका प्रागुक्ता पातयतीति पातिका, वानरपिटिका इह सुघरीदृष्टान्तः, परलोके कोकिलकश्च परिभट्ठउ सद्दसुणओ जाओ, इति उपप्रदर्शनार्थं, '**एवं संखाए**' एवं परिगण्य मुणी '**ण मज्जए**' मदं न कुर्यात्, '**जे यावि अणातए सिया**' वृत्तं ॥११३॥ जेत्ति अणिद्दिट्ठणिद्देसे नान्यो नायकोऽस्यास्तीत्यनायकः—चक्रवर्त्ति बलदेवो महामंडलिओ वा, वासुदेवो ण पव्वयति, निदानकृतत्वात्; तेन नाधिकारः, पेसगपेसगो णाम तेसिं चेव चक्किमादीणं जो पट्टिगावाहगो प्रव्रजितः स्यात्, असावपि तं चक्रवर्तिं प्रव्रजितः पूर्वं दासदासं बारसावत्तेण वंदणेण वंदति, वंदणमाणोऽपि वा 'इदं मोणपदमुवट्ठिए'त्ति इदमिति आरुहतं मुनेः पदं मौनं पज्जतेऽनेनेति पदं—मोक्षं गम्यत इत्यर्थः, उपेत्य स्थितः उवट्ठितो, न तेन पूर्वस्वामिना लज्जा कर्त्तव्या जहाऽहं पुव्वदासदासं वंदाविज्जामि, इतरेणापि न गर्वः, अहं सामिगसामिणा पूइज्जामि, '**समतं**'ति अरागद्वेषवानित्यर्थः, 'सदा' सर्व्वकालं चरेदित्यनुमतार्थः, स्यात्—कथं ताभ्यां लज्जामदौ न कर्त्तव्याविति ?, उच्यते, '**समयण्णयरम्मि संयमे**' वृत्तं ॥ ११४ ॥ ते हि सयं तत्त्वं प्रति समा चेव, अथवाऽयमपि छेदोपस्थानीये, एवं परिहारविशुद्धिकादिषु शेषेष्वपीति, अरिस्स मि० वृत्तं, तौ हि संयमत्वं प्रति समावेव, अथ समेत्ति एकस्मिन्नेव तौ संयमस्थाने वर्त्तयेतां, अण्णयरे वत्ति विसमे वा छट्ठाणपडितस्स, तेसु सम्यक्त्वादिष्वसंजम इतिकृत्वा अन्यतरे अधिके वर्त्तमानः

पूज्यः, संयतत्वादेव, अथवा जे यावि भवे अणायगे, जेवियं पेसगस्स पेसएत्ति, एगिगो माणेऽई उक्तः, इह तु 'समअण्णतरंमि वा सुते समेऽवि सुएणमिमं परिचिततरंतिकाउं स माणो ण कायव्वो, लहुं वा मे अधीतंति, अण्णयरं तु एगो गणी एगो वायगो, पूर्वगतं वाचितं येन स वाचकः, न च वाचकेन मानः कार्यः, संशुद्धो स एव, संयमः शुद्धः यत्रासौ वर्त्तते, अथवा स एवं लज्जा-मददोसादिएहिं संसुद्धो **'समणे'**त्ति सम्यक् मणे समणे वा समणो, परि समंता सव्वातियारसुद्धो सव्वओ वा परि वए परिव्वए, स्यात्कियच्चिरं कालं?, उच्यते **'जा आवकथा समाहिते'** यावदस्य कथा प्रवर्त्तते देवदत्तो यज्ञदत्तो वा, दव्विओ णाम रोग-दोसरहिओ, स्यान्मृतस्यापि कथा प्रवर्त्तते तत उच्यते **'कालमकासि पंडिते'** यावत्कालं न करोति तावन्मानादिदोषरहितेन भवितव्यं, स्यात्किल किमालंबनं कृत्वेति यतितव्यं?, उच्यते **'दूरं अणुपस्सिया'** वृत्तं ॥११५॥ दूरं नाम दीर्घं अनुपश्यति तं धम्म-मणागतं, तथा धर्म्मः स्वभाव इत्यर्थः, वर्त्तमानो धर्म्मो हि कालानादित्वाद् दूरः, स तु अविरतत्वान्मानादिमदमत्तस्य दुक्खभूयिट्ठो-ऽतिक्रान्तः, किं च इमेण खलु जीवेण अतीतद्धाए उच्चणीयमज्झिमासु गतिसु असतिं उच्चगोते असतिं णीयगोते होत्था, तथा च अतीतकाले प्राप्तानि सर्वदुःखान्यनेकशः, एवमनागतधर्म्ममपि, अथवा दूरमणुपस्सिअत्ति दढं पस्सिय, अथवा मोक्षं दूरं पस्सिय दुर्ल्लभबोधितां पस्सिय जात्यादिमदमत्तस्य च दूरतः श्रेयः एवमणुपस्सिय इत्येवमादि अतीतानागतान् धर्म्मान् अनुपस्सिता **'अट्ठे फरुसेहि माहणे'** फरुसा नाम स्नेहवियुक्तैः वाचिकाः कायिकाश्चोपसर्गा क्रियन्ते, तत्र वाचिकाः आक्रोशहीलनाद्याः कायि-कास्तु वधबंधनताडनाङ्गनच्छेदनमारणांताः, अथवा प्रतिलोमा फरुसा, तैरुदीर्णैः **'अवि य हण्णू'** अपि हन्यमानाः अविहण्णू यथा खन्धकशिष्याः, न तु खन्दकः, **'समयंसि रीयति'**त्ति यथा समयेऽतिदिष्टं तथा रीयते प्रसन्न इत्यर्थः, पठ्यते च **'अविहण्णू**

समयाधियासए' अस्यार्थः अविहण्णू-अविहन्यमानः सम्यक् अहियासए, अथवा अविहण्णू इति हन्यमानो न हन्यात् किंचित्, अथवा धर्म्ममस्योपदिशेत् स कीटकधर्म्मकथिक उच्यते, 'पण्णसमत्ते सया जए' वृत्तं ॥११६॥ प्रच्छंति तमिति प्रश्नः यावत्प्रश्नान् परः पृच्छेत् तं व्याकर्तुं समर्थः, पठ्यते च–'पण्हसमत्ते सदा जए' समाप्तप्रश्न इत्यर्थः, सदाजएत्ति ज्ञानवान् अप्रमत्तश्च, अयतस्य हि क्षीरं परिचिकित्सिकस्येव न वचः प्रमाणं भवति, उक्तं हि–"अट्ठितो ण ठवेति परं" समिता णाम सम्मं धम्मं उदाहरेज्ज, जहा पुण्णस्स कत्थति तथा तुच्छस्स कत्थति, 'सुहुमे हु सया अलूसए' सुहुमो नाम स हि सुहुमेणवि अतिचारेण लूसिज्जति, कथयतो वा सूक्ष्मेणापि आत्मोत्कर्षेण परहीलया वा लूसिज्जति, पूयागारवसक्कारहेउं वा कथयतो लूसेति, अहवा सुहुमेत्ति सूक्ष्मबुद्धिः कथयेत्, अलूषकस्तु स एवमनाशंसी, न च मार्गविराधना करोति, अपरियच्छंते य परे ण कुप्पेज्जा, णेव कथणलद्धीसंपण्णताए माणी माहणो होज्जा, अथवा कथयंतो ण परं कोवये–अन्यतरं कषायं गमयेत्, स एवं 'बहुजणणमणंमि संवुडे०' वृत्ते ॥११७॥ बहुजनं नामयतीति बहुजननामने, अहवा नम्यते–स्तूयत इत्यर्थः, स धर्म्म एव, सर्व्वलोको हि धर्म्ममेव प्रणतः, न हि कश्चित्परमाधार्मिकोऽपि ब्रवीति–अधर्म्मं करेमि, तत्रोदाहरणं–सेणिओ राया, तस्स अत्थाणीए धर्म्मजिज्ञासायां के धम्मिया इति, ततो परिसदेहिं भण्णति–दुल्लभा धम्मिया, पायं अधम्मिओ लोओ, अभयो भण्णति–लोगस्स भावपाएण एस पइण्णा जहा वयं धम्मिया इति, परिसाए असद्दहंतीए अभओ भण्णति–परिक्खामो, ततो रायाणुन्नाए सितासिताणि दुवे भवणाणि कारवेति, पउरजणवया भणिया–जे तुम्हं धम्मिया ते धवलं गिहं पविसंतु, अधम्मिया असियमिति, ततो ते सव्वे पउरजणा धवलगृहमणुपविट्ठा, अधिगारिगेहिं पुच्छिता–किं भवंतो धर्म्मं करेहिंति ?, तत्थेगो भणति–अहं करिस्सगो, तत्थ मे अणेगेहिं गउणसहस्सेहिं

धण्णं उवजीविज्जति, अण्णो भणति–अहं वणिज्जो, कलोपजीवि बंभणो मे णिच्चगं भुंजतित्ति, अण्णो भणति–अहं कुटुंबभरणपवित्तो किलेसभागी, किं बहुणा ?, सोयरियादयोऽवि कुलधम्मानुवर्तित्वाद्वयमपि धम्मिया, एवं धवलगिहमणुपविट्ठा, उक्तं च–"सोतसुतघोररणमुह०" अथ तत्थ दुवे सावगा सकृत्मद्यपाननिवृत्तिकृतभङ्गा असितभवणमणुपविट्ठा पुच्छिता भणन्ति—सुसाहुणो सुसावगा य धम्मिया जे सया अपमत्ता, अम्हे पुण पमादिणो स्वकृतमद्यपाननिवृत्तिकृतभंगा ण धवलगिहारुहा, अतो असितभवणमणुपविट्ठा इत्येवं बहुजननमितो धर्म्म इति, तस्मिन् बहुजननमिते संवृतात्मा भवेदिति वाक्यशेषः, अन्ये त्वाहुः–बहुजननमनो–लोभः, सर्वो हि लोकस्तस्मिन् प्रणतः, असंयतास्तावत् सर्वे शब्दादिविषयप्रणताः, प्रमत्तसंयता अपि तेनैव केचित्प्रणताः, वीतकषायास्त्वप्रणताः, जे य जयणा अप्पमत्ता इति तेऽपि न प्रणताः, उक्तं च—'कोधस्स उदयणिरोधा वा उदयपत्तस्स वा कोहस्स विहलीकरणं' एवं योगेन्द्रियाणामपि वक्तव्यं, संयतो नाम विरतः निवृत्त इत्यर्थः, 'सव्वट्ठेसु सदा अणिस्सिते'त्ति सव्वेसु इंदियत्थेसु यावंतो वा असंयमार्थाः अथवा ऐहिकामुष्मिकेषु अणिस्सितो नाम नाकांक्षति 'हरदे व तुमे अणाइलो' हरदेत्ति, महासमुद्रः, स हि तक्रादिभिः महामत्स्यैः स्फुरद्भिरपि नाकुलजलो भवति, न क्षुब्धजल इत्यर्थः, पद्ममहापद्मादयो वा ह्रदाः स्वच्छप्रसन्नगंभीरजलाः गंभीरत्वादनाकुलाः, एवमसावपि पूर्वापरज्ञेयपरिशुद्धस्वच्छज्ञानवान् प्रसन्नवाङ्मनाः न च परप्रवादिभिः शक्यते विक्षोभयितु इत्यनाकुलः, कोधादीहि वा अणाइलो, अथवा अणाइल इति निरुद्धाश्रवः अनातुरो—न ग्लायति धर्म्मं कथयन्, 'धर्म्मं पादुरकासव'त्ति प्रादुः प्रकाशने स भगवान् आर्यसुधर्म्मः अण्णतरो वा गणधरो ह्रद इवानाकुलः धर्म्मं प्रादुरकार्षीत्, एवमन्येऽपि स्थविराः प्रादुरकार्षीत् प्रादुष्कुर्वन्ति करिष्यंति च, कस्यपश्यायं काश्यपः, स एवं लक्षणकं धर्म्मं कथयति, तं च वा

'बहवो पाणा पुढो सिया०' वृत्तं ॥ ११८ ॥ अथवोपदेश एवायं, बहवो प्राणा पुढो सिता, बहव इत्यनन्ताः, पृथक् पृथक् सिता पुढोसिता, तंजहा–पुढविकाइयत्ताए०, तेषां तु प्रत्येकानन्तानामप्येको धर्म्मः समान एव, सुखप्रियत्वं 'समियं उवेहाए'त्ति समिता णाम समता, प्रत्येकाश्रयेऽपि सति अभीष्टसुखता दुःखोद्वेगता च समानमेतत्, अथवा समिया इति समं उवेहिताः जे मोणपदं उवट्ठिए, मुनेरिदं मौनं, विरमणं विरतिः तेषामतिपातादीनां अकासित्ति करिष्यसि, पापाङ्गीनः पंडितः, का भावना ?, यथा तवैते इष्टानिष्टे सुखदुःखे एवं पाणाणमवि इत्येवं मत्वा विरतिं तेषामकासि पंडिते, स एव विरतात्मा 'धम्मस्स य पारए मुणी०' वृत्तं ॥ ११९ ॥ धम्मो दुविहो–सुतधम्मो चरित्तधम्मो य, तयोः पारं गच्छतीति पारगः, श्रुतज्ञानपारंगतः चोद्दसपुव्वी, पारं वा कांक्षति, एवं पारं गतः कांक्षति वा अकषायः, तस्य च चारित्रमधिकृत्यापदिश्यते, आरंभो नाम जीवकायसमारंभस्तस्यांते व्यवस्थितो, नारभत इत्यर्थः, जे य पुण आरंभपरिग्गहे वट्टंति ममायंति वा ते तं परिग्गहं णट्ठविणट्ठं 'सोयंति य णं ममायणो' अलभ्यमाणमपि यथेष्टपरिग्गहं सोयंति णं ममाइणो, उक्तं हि–"परिग्गहेष्वप्राप्तनष्टेषु काङ्क्षाशोकौ, प्राप्तेषु च रक्षणमुपभोगे वाऽवृत्तिः" णो लब्भति णियं परिग्गहंति अग्गिसामण्णत्ताए चोरसामण्णत्ताए णितओ ण भवति, अयमपरकल्पः तमिव, धम्मस्स य पारए मुणी, आरंभस्स य अन्तिअट्ठितं सोयंति य णं ममाइणो अम्हे सुहिता, तुम्हं संतविभवोऽवि अतिदुक्करं तवचरणं करेसि, जेणं ममायंते तेणं ममायणो–मातापुत्रादयो णो लब्भंति परिग्गहंति, स तेषां नित्यं वशकः आसीदिति नित्यं परिग्रहः परः, ततस्तत्प्रत्ययिकं णो लभति णितियं परिग्गहं, अमुमेवार्थं नागार्जुनीया विकल्पयंति-सोऊण तयं उवट्ठितं केयि गिही विग्घेण उट्ठिता। धम्मंमि इहं अणुत्तरे, तंपि जिणेज्ज इमेण पंडिते 'इह लोग दुहावहं विदा परलोगे य दुहं दुहावहं' ॥ १२० ॥ कृषिभृत-

चौरादीनां इहलोगे एव दुहावहं धणं, उक्तं हि–अममा जनयंति कांक्षितां, निहिता मानसचौरजं भयम्। विद्रुंति जना हि०" परलोकेऽपि च दुहं असाद्वनोपार्जनदुःखात् सुमहत्तरं दुःखं समावहंतीत्यतो दुहादुहावहा, अथवा दुहादुहा वा पुनरनन्ते संसारे पर्यटन्तः शरीरादिदुःखं समावहंति 'विद्धंसणधम्ममेव या' अग्गिचौराद्युपद्रवैः कालपरिणामतश्च विद्धंसणधम्ममेव या इत्येवं विद्वान् मत्वा को नाम आगारमावसे?, किंचान्यत्–पव्वइतेणवि न सत्कारवंदणणमंसणाउ बहु मानितव्वा, उक्तं च तत्थ–'महता पलिगोह जाणिया०' वृत्तं ॥१२१॥ परिगोहो णाम परिष्वंगः, दव्वे परिगोहो पंको भावे अभिलापो बाह्याभ्यन्तरवस्तुषु, परस्परतः साधूनां जावि वंदणणमंसणा सावि ताव परिगोहो भवति, किमंग पुण सद्दादिविसयासेवणं?, अथवा प्रव्रजितस्यापि पूजासत्कारः क्रियते, किमंग पुण रायादिविभवासंसा?,'सुहुमे सल्ले दुरुद्धरे' सूचनीयं सूक्ष्मं, कथं?, शक्यमाक्रोशताडनादि तितिक्षितुं, दुःखतरं तु वन्द्यमाने पूज्यमाने वा विपर्ययैर्वा विलोभ्यमाने निःसंगतां भावयितुं, इत्येवं सूक्ष्मं भावशल्यं दुःखमुद्धर्तुं हृदयादिति वाक्यशेषः, इत्येवं मत्वा विद्वान् 'पयहेज्ज संथवं' सम्यक् स्तवः सतो वा स्तवः संथवो, नागार्ज्जुनीयास्तु पठंति-पलिमंथ मह्यं विजाणिया जावि य वंदणपूयणा मह। सुहुमं सल्लं दुरुद्धरं तंपि जिणे एएण पंडिए''एगे चरे ठाण आसणे०' वृत्तं ॥१२२॥ द्रव्ये एगल्लविहारवान् भावे रागद्वेषरहितो वीतरागः, ठाणं–काउस्सग्गो आसणं–पीढफलगं भूमिपरिग्गहो वा सयणंति णुवण्णो, एगो रागद्वेषदोसरहितो, सव्वत्थ पवादणिवादसमविसमेसु ठाणणिसीयणसयणेसु एगभावेण भवितव्वं, णाणादिसमाहितो, चरेदित्यणुमतार्थे, भिक्खू 'उवहाणवीरिए' उपधानवीर्यवानिति तपोवीर्यवान्, 'वइगुत्ते'त्ति वयगुत्तिगहिता 'अज्झप्पसंवुडे'त्ति मणोगुत्ती गहिता, पूर्वार्द्धेन तु कायगुप्तिः। इदाणिं जो सो एगल्लविहारी तं दुच्चरे य णिकारणेण भण्णति–'णो पीहे ण यावं-

वंगुणे' वृत्तं ॥१२३॥ पिहितं णाम ढक्कियं, अवगुत्तदुवारिए सुण्णघरे वा भिन्नघरे वा, शूनां हितं शून्यं, शून्यं वा यत्राऽन्यो न भवति, पुट्ठो ण उदाहरे वयिं, चत्तारि भासाओ सोत्तूण उदाहरति वयिं, अवस्सं संबुज्झितुकामस्स वा एगनायं एगवागरणं वा जाव चत्तारि, णिसीयणट्ठाणे मोत्तूण सेसं वसधिं 'ण संमुच्छति'त्ति ण पमज्जति,'णो संथडे तणे'त्ति ण वा तणाइं संथरेति, किमंग पुण किंचि पोत्ति वा ?, स एवं सरीरोवस्सयादिसु अप्रतिबद्धः अणियतवासित्वात् 'जत्थऽत्थमिते अणाइले'वृत्तं ॥१२४॥ जत्थ से अत्थमिति सूरो जले थले वा तत्थ वसति, अणाइलो णाम परीषहोपसर्गैः नक्रैः समुद्रवत् नाकुलीक्रियते, समविसमाइं ठाणसयणासणाइं मुणीऽधियासए, न रागद्वेषौ गच्छेत्, तत्थ से अच्छमाणस्स 'चरगा अहवावि भेरवा' चरंतीति चरका-पिपीलिकामत्कुणघृतपायिकादयः भेरवा-पिशाचश्वापदादयः सरीसृपा-अहिमूषिकादयः सव्वे अहियासएत्ति, एवमन्येऽपि 'तिरिया मणुसा य दिव्विया' वृत्तं ॥ १२५ ॥ तिरिया चतुर्विधा उवसग्गा तिविहाधि सेविया नामासेवित्वा अणुभूय 'लोमादीयंपि ण हारिसे' लूयत इति लोमा लोमहरिसो दुधा भवति-प्रतिलोमैर्भयात् अनुलोमैः प्रहर्षेण हासतः, आदिग्रहणात् दृष्टिमुखप्रमादो दैन्यं वा, 'सुन्नागारगते महामुणी' स तैर्भैरवैरप्युपसर्गैरुदीर्णैश्छिद्यमानो मार्यमाणो वा 'णो ताव सिकंव जीवितं' वृत्तं ॥ १२६ ॥ अनुलोमैर्वा उदीर्णैः असंजमजीवितं ण वा पूयासक्कारं पत्थेज्ज, तेनैवं जीवितमनाकांक्षता पूजासत्कारौ च, भयानके वाऽऽवसथे वसता 'अब्भत्थमुवति भेरवा' अभ्यस्ता नाम आसेविता असकृद् असकृत्सहमानेन जाता उदिता आसेविता अभ्यस्ता इत्यतः उपेन्ति-उपयान्ति भयानकाः, पठ्यते च-'अप्पुत्थं उवेंति भेरवा' अल्पा न बहवः पिशाचश्वापदव्यालादयः जीवितान्तयिका उवेंति, शीतोष्णदंशमशकादयस्तु उदीर्णा अपि शक्याऽधिपोढुमिति, अभ्यस्तत्वान्निराजितवारणस्येव भैरवा एव भवंति,

तस्यैवं 'उवनीततरस्स ताइणो०' वृत्तं ॥ १२७॥ भिक्षोः धर्म्ममुपनीतः परीषहजयं वा, अयं चोपनीतः २ अयमनयोरुपनीततरः ज्ञानदर्शनचारित्रेषु यस्यात्मा उपनीततरः स भवत्युपनीततरः, त्रायतीति त्राता, स च त्रिविधः—आत्म०पर०उभयत्राता—जिनकल्पिकार्हद्गच्छवासिनः 'भयमानस्स विवित्तमासनं' इत्थीपसुपंडगविरहितं विवित्तं आसनग्रहणादुपाश्रयोऽपि गृहीतः 'सामाइयमाहु तस्स तं' समभावः सामाइयं आहुः तस्स तं समभावं सामाइयं तस्सेवंगुणजातियस्स सामायिकं, कतरं ?, चारित्तसामाइयं, आहु—उक्तवानिति तित्थकरो अज्जसुहम्मो वा सिस्साण कथेति, तस्य चारित्रधर्म्मः, किं करोति ?, यः आत्मानं भये न दर्शयति, न क्षुभ्यत इत्यर्थः, किंचान्यत्—'उसिणोदकतत्तभोयणो०' वृत्तं ॥१२८॥ उसिणग्रहणात् फासुगोदगं सोवीरगउण्होदगादीणि गहिताणि, तप्पग्गहणात् स्वाभाविकस्यातपोदकादेः प्रतिषेधार्थः, धर्मेण यस्यार्थः स भवति धम्मट्ठो, ह्री लज्जायां, असंयमं प्रति ह्रीर्यस्यास्ति स ह्रीमान् तस्य ह्रीमतः, स हि लोके शीतोदकं पिबन् लज्जते, ह्रीयत इत्यर्थः, तस्येवमप्रमत्तस्य आसतःसंमग्गि असाधु 'रायिहि' राजादिभिस्तस्यासाध्वी, कथं ?, रिद्धिं दृष्ट्वा तं मा भून्मूर्च्छां कुर्यात्, मूर्च्छतश्च असमाधी भवति 'तधागतस्सवि'त्ति वैराग्यगतस्यापि, अथवा यथाऽन्ये, यथा जिनादयो गता वीतरागं तथा सोऽवि अप्रमादं प्रति गतः, इदानिं प्रमत्ता उच्यन्ते—'अधिकरणकरस्स भिक्खुणो०' वृत्तं ॥१२९॥ अधिकरणं करोतीति अधिकरणकरः, 'प्रसह्ये'ति आक्रम्य परपरिभवात् संबंधं स्नेहसंततिं दारयति ततः दारुणं, 'अट्ठे परिहायते ध्रुवं' अर्थो नाम मोक्षार्थः तत्कारणादीनि च ज्ञानादीनि परिहायंति, "जं अज्जियं समीखल्लएहिं तवणियमबंभमइएहिं। मा हु तयं छड्डेहि य बहुतरयं सागपत्तेहिं ॥ १ ॥ एतेण कारणेणं अधिकारणं ण करेज्ज संजते स्वपक्षपरपक्षाभ्यामितिवाक्यशेषः, तस्यैव अधिकरणमकुर्वाणस्य 'सीतोदगपरिदुगुंछिणो' वृत्तं ॥ १३० ॥ सीतोदगं णाम अवि-

गतजीवं अफासुगं प्रती, प्रतिदुगुंछति णाम ण पिवति, यो हि यन्न सेवति स तत् जुगुप्सत्येव, जहा धीयारा गोमांसमद्यलसुनपलंडुं दुगुंछंति, न केवलं धीयारा गोमांसं दुगुंछंति, तदाशिनोऽपि जुगुप्संति, अप्पडिण्णो णाम अप्रतिज्ञः, नास्य प्रतिज्ञा भवति यथा मम अनेन तपसा इत्थं णाम भविष्यतीति, तंजहा–णो इहलोगट्ठताए तवं करोति० जहा धम्मिवयं भदन्ता, आलयाहारउवधिपूयाणिमित्तं वा अप्रतिज्ञः, लवं–कर्म्म येन तत्कर्म्म भवति ततः आश्रवात् स्तोकादप्यवसकति, तस्यैवंविधस्य 'सामायिकमाहु तस्स' जं तदेवास्य सामायिकं–चरित्रसामायिकं, यत्किं ?, न करोति, जं गिहिमत्ते असणं ण भक्खति, मा भूत् पच्छाकम्मदोसो, भविस्सति णट्ठे हिते वीसरिते, स एव सीतोदगवधः स्यादिति। किं च 'ण य संखतमाहु जीवितं' वृत्तं ॥ १३१॥ णहि छिन्नतंतुवत् इहं जीवितं पुनः शक्यते संस्कर्तुं, 'तथे'ति तेन प्रकारेण, बालजणो णाम असंयतजनः, प्रगल्भीभवति प्राणातिपातादिषु प्रवर्त्तमानो धृष्टो भवतीत्यर्थः, स एव बालः पापेषु कर्म्मसु प्रगल्भीभवन् तैरेव बाले पावेहि मज्जति हिंसादीहिं, तज्जणिएण वा कर्म्मणा मानभंडमिव मीयते पूर्यत इत्यर्थः, मार्यते वा संसारे, 'इति संखाय मुणी ण मज्जति' इति संस्कार्यते, एवं परिगणय्य ण मज्जतित्ति–न यदं कुर्यात्–न कुप्येत, मानाधिकार एव अस्मिन्नुद्देशके वर्ण्यते, तेण इति संखाए मुणी ण मज्जति, क्रोधो माने(मदो)ऽपि गृहीतो, लोभस्तु 'छंदेण पलेति मायया' वृत्तं ॥१३२॥ छंदो णाम लोभः इच्छा प्रार्थना, तेण छंदेण प्रलीयते यं प्रजाः तासु तासु गतिषु भृशं लीयते–गच्छति, पठ्यते च 'छण्णेण पलेति मायया' छंदेणेति डंभेणोवहिणा कूटतुलकूटमानादिभिः तथा हिंसादिषु कर्म्मसु प्रवर्त्तते दंभेणेव, पलायितुमिच्छति कर्म्मबन्धात्, यथा मारेंतोऽवि य देवस्सुवरिं छुभति, महर्षिप्रणीतोऽयं मार्गः, तथा चित्तं न दूषयितव्यं इति, पाषंडिनोऽपि शाक्यादयः छणेण पलायितुमिच्छंति कर्म्मबन्धात्, तद्यथा–संघ-

संतगा ग्रामाः, दासीदासहिरण्यादि च ते उपासगसंता वा, भागवता ब्रुवते–सव्वं देवो करेति, यथा छण्णेण तथा लोभादिभिरपि 'बहुमाये'ति उत्कंचणादि, पासंडिनोऽपि मायाबहुला कुक्कुडेहिं लोअं उवचरंति, उक्तं हि–कुक्कुडसाध्यो लोको नाकुक्कुटतः प्रवर्त्तते किंचित्। तस्मात् लोकस्यार्थे पितरं (अवि) सकुर्कुटं कुर्यात् ॥१॥' चित्तप्रामाण्यं वर्णयन्ति, मोहो नामाज्ञानं तेन प्रावृता छादिता इत्यर्थः, शासनाश्रितास्तु 'वियडेण पलेति माहणे' भावेनेति वाक्यशेषः, तेनाकुडिलेनावि अविकुत्थितेनाजिम्हेन, कुतः पलीयते ?, संसारात्, न केवलमात्मा शुद्ध्या पलीयते, बाह्येनापि पलीयते, तद्यथा–'सीउण्हं वयसाऽधियासए' सीते अप्रावृतः उष्णे आतापयति, अथवा सीता अनुलोमाः उष्णाः प्रतिलोमाः, वयसेति वाचा, यथा वयसा तथा मनसावि, एवं सेसिंदियदमोवि, किंच–जं बहुपसण्णं तं गेण्हाहि चिट्ठंते, 'कुजए अपराजिए जहा०' वृत्तं ॥१३३॥ कुच्छितो जयः कुजयः द्यूतेण थोवं विढप्पति, यद्यपि अपराजितो अक्खेहि देवताप्रसादेन वा अक्खहितत्तेण वा अपराजितो तथापि कुत्थित एव जयः, अक्खापासगादिषु क्रीडाव्यवहाराः, अक्षैर्दीव्यति दिव्यं, दिव्यं चास्यास्तीति दिव्यवान्–क्रीडावान्, जह सो दिव्वं च कडमेव गहाय, णो कलिं णो त्रेतं णो चेव दावरं, उवसंहारः 'एवं लोगंसि ताइणो०' वृत्तं ॥ १३४ ॥ एवम्–अनेन प्रकारेण अस्मिँल्लोके पासंडलोगे वा 'ताइणो'त्ति आत्मपरोभयत्रायिणो–जिनतीर्थंकरस्थविराः 'वुइते' उक्तः 'अयं'ति इमो जइधम्मो सुतचरित्तधम्मा य 'अनुत्तरे' बहुफले, अतुल्ये इत्यर्थः, 'तं गेण्ह हेतंति उत्तमं' तमिति तं धर्म्मं गेण्हाहि इहलोए परलोए य हितं, इहलोए आमोसहिलद्धीओ परलोए सिद्धी देवलोगसुकुलपच्चायादि, 'ते' इति तस्य ग्रहे, कस्य निर्देशः ?, उत्तमः–प्रधानः, धर्म्म इति वर्त्तते, कडमिव द्यूतकरवत् सेसा तिण्णि आता, पासत्था अण्णतित्थिया गिहित्था य, अवहाय–छड्डेत्ता, को भवति ?, उच्यते, पंडितो भवति, किं

च–एषा हि शब्दादीनां त्वग्परीषह एव गरीयान् अत एवोच्यते 'उत्तरमणुयाण आहिता' वृत्तं ॥ १३५ ॥ उत्तरा णाम शेषविषयेभ्यः ग्रामधर्म्मा एव गरीयांसः, यथा मयाऽनुश्रुतं स्थविरेभ्यस्तैः पूर्वं श्रुतं पश्चात्तेभ्यो मया श्रुतं, उक्तं हि–"सुखस्यातिरसः स्वर्गः, स्वर्गस्यातिरसः स्त्रियः। गवामतिरसः क्षीरं, क्षीरस्यातिरसो घृतं ॥ १ ॥ सर्व्व एव वा विषयग्रामधर्म्मः, अथवा उत्तराः–शब्दादयो ग्रामधर्म्मा मनुष्याणां चक्रवर्तिबलदेववासुदेवमंडलिकानां तेसु उत्तरेसुवि 'जंसि विरता समुट्ठिता' जासु इत्थिगासु सम्यक् उट्ठिता समुत्थिताः, 'कासवस्स अनुधम्मचरिणो' काश्यपो–वर्द्धमानस्वामी काश्यपचीर्णानुचरणशीलाः कासवस्स अणुधम्मचारिणो, अथवा ऋषभ एव काश्यपः तेन चीर्णमनुचरंति यथोद्दिट्ठं 'जे एत चरेंति आहितं' वृत्तं ॥ १३६ ॥ जे इति अणुद्दिट्ठणिद्देसे, जे अणुधम्मचरित्तं कुर्वन्ति, आहितं–आख्यातं, केण ?, 'णाएण महता' ज्ञातकुलीयेन महता इति, ज्ञातृत्वेऽपि सति राजसूनुना केवलज्ञानवता च, महाँश्चासौ ऋषिश्च महर्षिः, अथवा मोक्षेसिणा, ते उट्ठिता, उत्थिता नाम मोक्षाय, सम्यगुत्थिताः समुत्थिताः, न जमालिवत्, शाक्यादयोऽपि हि मोक्षार्थमभ्युत्थिताः, 'अन्योऽन्यं च सीदंतं सारेंति धर्म्मत' इति धर्म्मे सीदंतं, अथवा धम्मियाए पडिचोयणाए, अथवा धर्म्मे सालितं स्खलंतं वा धम्मियाए पडिचोयणाए धम्मिएणं, पडोआरेणं, धर्म्मे सम्यगवस्थितश्च भूत्वा 'मा पेह पुरापणामए' वृत्तं ॥ १३७ ॥ अमानोनाः प्रतिपेधे, मा प्रेक्षस्व, पुरा नाम पूर्व्वकालिए पुव्वरतपुव्वकीलितादि, प्रणामयंतीति प्रणामकाः दुग्गतिं संसारं वा प्रति धर्म्मे स्थितं, संक्षेपार्थस्तु पुव्वकीलितं ण सुमरेज्जा, धर्म्मं वा प्रति प्रणामयेदात्मानं, उवधिं दव्वे हिरण्णादि भावोवधिं अट्ठविधं कम्मं, अभिमुखं कंखेज्जासित्ति अभिकंखे उवधिं धुणित्तए, मानाधिकारेऽनुवर्त्तमाने 'जे दूवणतेहि णो णता' जे इति अणिद्दिट्ठणिद्देसे दुट्ठं प्रणताः दूपनताः शाक्यादयः, ते हि मोक्षाय प्रवृत्ता अपि

विषयेषु प्रणता रसादिषु, नेति प्रतिषेधे, आरंभपरिग्रहेषु ये न नता ते जानंति समाहितं, त एव ज्ञानवन्तः ये सम्यङ्मार्गाश्रिताः, न तु अज्ञानिनो, न वा समाधिं जाणंति, समाधिर्नाम रागद्वेषपरित्यागः, स एवं समाधिमार्गावस्थित, 'णो काहिएँ होज्जा संजते' वृत्तं ॥१३८॥ कथयतीति कथकाः अक्खाणगाणि गोयरग्गगतो उवस्सयगतो वा अप्रतिमानानि कथयति कथिकः, पासणीओ णाम गिहीणं व्यवहारेषु पणियगादिसु वा प्राश्निको, न भवति, अपाया तत्थ जो जिज्ञति तस्स अप्पियं भवति, संपसारको नाम संप्रसारकः, तद्यथा इमं वरिसं किं देवो वासिस्सति णवत्ति, किं भंडं अग्घिहिति वा न वा ?, उभयथापि दोषः, अधिकरणसंभवात्, अग्घिहिति णवत्ति, 'नच्चा धम्मं अणुत्तरं' एवंविधेन न भाव्यं, कतकिरिओ णाम कृतं परैः कर्म्म पुट्ठो अपुट्ठो वा भणति शोभनमशोभनं वा एवं कर्त्तव्यमासीत् नवेति वा, मामको णाम ममीकारं करोति देशे गामे कुले वा एगपुरिसे वा, किंच–अयं चान्यः कर्म्मविदालनोपायः, तद्यथा–'छण्णं च पसंस णो करे०' वृत्तं ॥१३९॥ द्रव्यच्छन्नं निधानादि भावच्छन्नं-माया, भृशं पसंसा–प्रार्थना लोभः उक्कोसो–मानः प्रकाशः–क्रोधः, स हि अन्तर्गतोऽपि नेत्रवक्त्रादिभिर्विकारैरुपलक्ष्यते, उक्तं हि–"कुद्धस्स खरा दिट्ठी" य एवं कषायनिग्रहोद्यताः तेसिं सुविवेकः गृहदारादिभ्यो विवेको बाह्योऽभ्यन्तरस्तु कषायविवेकः, आहितं–आख्यातं, सुविवेगोत्ति वा सुणिक्खंतं वा सुपव्वज्जत्ति वा एगट्ठं, भृशं नता प्रणताः, कुत्र नता ?, धर्म्मे वा 'सुज्झोसितं'ति जुषी प्रीतिसेवनयोः, धूयतेऽनेनेति धूतं–ज्ञानादि संयमो वा येषां सुज्झोसितं–स्वभ्यस्तं तेसिं सुविवेगमाहिते। स एवं विदालनामार्गमाश्रितः 'अणिहे सहिते सुसंवुडे०' वृत्तं ॥ १४० ॥ अनिहो नाम अनिहतः परीषहैस्तपःकर्म्मसु वा नात्मानं विंधयति, ज्ञानादिषु सम्यगाहितः णाणादीहि २ आत्मनि वा हितः स्वहितः, अथवा यस्त्रिगुप्तः स समाहितो, धर्म्मेण यस्यार्थः स भवति धम्मट्ठी तवोवधाणवीरीय-

संयुक्तः तवे वारसविधे, स एवं गुणजुत्तो 'विहरेज्ज समाहितेंदिए' अनियतवासित्वं गृह्यते, समाहितो, निगृहीतेन्द्रियत्वं च, उक्तं हि–"सद्देसु य भद्दयपावएसु, सोतव्विसयं उवगतेसु। तुट्ठेण व रुट्ठेण व समणेण सया ण होयव्वं ॥१॥" एवं सेसिन्दियविसएसुवि, स्यात्–किमर्थं एवंविधः प्रयत्नः क्रियते अतिदुःखश्च ?, उच्यते, 'आतहितं दुक्खेण लब्भते' तंजहा–'माणुस्सखेत्त जाती' गाथा ॥ स्यात्–कथं अनादिमति संसारे अयमात्मा न पूर्वमेवानेन पथा प्रयात इति ?, उच्यते 'णहि णूण पुरा अणुस्सुतं०' वृत्तं ॥१४१॥ नेति प्रतिषेधे, हि पादपूरणे, नूनमनुमाने, पुरा इति क्रमात् अतिक्रान्तकालग्रहणं, अनुगतं श्रुतं अनुश्रुतं, किंच तत् ?, उच्यते, वक्ष्यते हि–मुणिणा सामाइयं पदं, अथवा मुणेत्तावि अवितहं णो अधिट्ठितं, अवितहं णाम यथावत्, अधिट्ठितं णाम करणे, तदिदं मुनिना सामाइयं पदं आख्यातं इत्यर्थः, समता सामाइयं, तच्च अनेकप्रकारं, कतरेण मुनिना तदाख्यातं ?, 'णातएण जगसव्वदंसिणा' जगे सव्वं पस्सति जगसव्वदंसी, 'एवं माता(मत्ता)महन्तरं०' वृत्तं ॥१४२॥ एवमधारणे, महन्तरं मत्वा-ज्ञात्वा, तत् कस्य कयोः केषां वा ?, उच्यते, सुत्तस्स य असुत्तस्स य, विरतीए अविरतीए, मोक्खसुहस्स संसारसुहस्स य सच्छासननयस्य मिथ्यादर्शनानां च, अथवा इमं धम्मं महत्तरं मत्वा कुप्रवचनेभ्यः, सहिता नाम ज्ञानादिभिः, बहवो जना इति अणंतातीतकाले सिद्धाः संपदं च, 'गुरुणो छंदाणुवत्तगा' गुरवः-तीर्थकरादयः छंदः-अभिप्रायः विरता भूत्वा विषयकषायेभ्यः तीर्णा भवौघं तरंति च, द्रव्यौघः समुद्रः भावौघस्तु संसारः, आहितमाख्यातं कथितमित्येकोऽर्थः इति वैतालीये द्वितीयोद्देशकः २–२ ॥

सूयणाधिकारे प्रस्तुते विदारणाधिकारोऽनुवर्त्तते, उक्तं हि–'उद्देसगंमि ततिए अण्णाणचियस्स अवचयो होहि। स च सुहसातस्स ण भवति, परीषहसहिष्णोर्भवति, स कथं ?, उच्यते 'संवुडकम्मस्स भिक्खुणो०' वृत्तं ॥१४३॥ संवृतानि यस्य प्राणव-

धादीनि कर्म्माणि स भवति संवुडकम्मा, इन्द्रियाणि वा यस्य संवृतानि स भवति संवृत्तः, निरुद्धानीत्यर्थः, यस्य वा यत्नवतः चंकमणादीनि कम्माणि संवृतानि, अथवा मिथ्यादर्शनाविरतिप्रमादकपाययोगा यस्य संवृता भवंति स संवृतकर्म्मा, भिक्खणसीलो भिक्खू, जमिति अणिद्दिट्ठस्स णिद्देसे, दुक्खमिति कम्मं, पुट्ठं णाम वद्धपुट्ठणिधत्तणिकाइतं, अबोधिए णाम अण्णाणेण धम्मं अवुज्झमाणेणं, यावन्न ताव सुवुध्यते स्म तं संजमतो विवज्जति, तं पंचणालिविहाडिततडागदृष्टान्तेन, निरुद्धेसु च नालिकामुखेषु वातातापेनापि शुष्यते, ओसिच्चमाणं च सिग्घतरं सुक्खति, एवं संयमेण निरुद्धाश्रवस्य पूर्वोपचितं कर्म्म क्षीयते, आह–तपः अभ्यन्तरं, एवं उक्तः, दशप्रकारेन्द्रियादिसंलीणता उक्ताः इंद्रियपडिसंलीनता जोगपडिसंलीणता कसायपडिसंलीणत्ता, संवृतात्मकस्तु अनशनावमौदर्यादितपोयुक्तस्य उत्सिच्यमानमिवोदकं क्षिप्रं कर्म्मापचीयते, सेलेसिं पडिवण्णो उक्कोसो संवुडो, मणुस्ससंतियं 'मरणं हेच्च वयंति पंडिता' मोक्खं, अथवा म्रियते येन तन्मरणं, तच्च कर्म्म संसारो वा, तं हित्वा व्रजंति मोक्षं तेनैव भवग्गहणेण व्रजंति तान् प्रतीत्यादिश्यते–'जे विण्णवणाहिं झूसिता' वृत्तं ॥१४४॥ विज्ञापयंति रतिकामा विज्ञाप्यन्ते वा मोहातुरैर्विज्ञापनाः–स्त्रियः, जुषी प्रीतिसेवनयोः, अजुषिता नाम अनादियमाणा इत्यर्थः, विज्ञापनासु हि पंचापि विषयाः स्वाधीना शब्दादयः, उक्तं हि–'पुप्फफलाणं च रसं सुराएँ मंसस्स महिलियाणं च। जाणंता जे विरता ते दुक्करकारए वंदे ॥ १ ॥" संस्पृष्टा वा ताभिः, कौमारब्रह्मचारिणः ते 'संतिण्णेहि समं वियाहिता' सम्यक्तीर्णाः संवृतात्मानो भूत्वा संसारौघं तीर्णाः मोक्षं जिगमिषवोऽपि हि अतीर्णा अपि तीर्णा इव प्रत्यवसेयाः, विविधं आहिता वियाहिता 'तम्हा उड्ढंति पासध' तम्हादिति तस्मात्कारणात् यस्माद्विज्ञापनासु अजुषिता संतिण्णा हि संमं वियाहिया, तीर्णमबन्धकत्वं च प्रति समाः, ऊर्द्धमिति मोक्षः तत्सुखं वा, तं

दृष्ट्वा कामभोगा द्रष्टव्या, एकार्बुदपरिश्रावणवत् व्रणालेपनवद्वा, पठ्यते च—'उड्ढं तिरियं अधे तधा' उड्ढं दिव्वा कामा अधे भवणवासिणं तिरियं तिरिक्खमणुस्सजोणिवाणमंतरा, ते तिविधेवि य दृष्ट्वा कामाणि रोगवत् अधिकं अत्यर्थं वा, यथा रोगा दुक्खावहा एवं कामा अपि, अट्ठविधकम्मरोगापत्तेः, सो भवति एवं, सेसावि आसवदाराणि जोएयव्वाणि, एयं संवुडत्तणं विरइं च कहं तरेज्ज ?, दिट्ठंतो 'अग्गं वणिएहि आहियं' वृत्तं ॥१४५॥ यदुत्तमं किंचित्तदग्गं, तद्यथा वर्णतः प्रकाशतः प्रभावतश्चेत्यादि, तच्च रत्नादि, तत्तु द्रव्यं वणिग्भिरानीतं राजानो धारयंति तत्प्रतिमा वा, तत्तु वस्त्रमाभरणादि वा, तथैव चाश्वो हस्ती स्त्री पुरुषो वा, यो वा यस्मिन् क्षेत्रे प्रधानं द्रव्यं धारयति, शब्दादिविषयोपगतः परिभुंक्त इत्यर्थः, राजस्थानीया जीवाः, जेहिं मिच्छत्तादि दोसे खवित्ता खयोवसममाणिता वा वारसविधा वा कसाया ते परमाणि महव्वतरयणाणि राईभोयणवेरमणछट्ठाणि राजान इवाग्राणि रत्नानि वणिग्भिरानीतानि धारयंतीति अग्रं प्राधान्यं, पूर्व्वदिग्निवासिनामाचार्याणामयमर्थः, अपरदिग्निवासिनस्त्वेवं कथयंति—ते जे विण्णवणाहिं अजोसिता संतिण्णेहि समं विहायिता तेन सर्व्व एवायं लोकः महाव्रतानि प्रतिपद्यते, उच्यते, 'अग्गं वणियेहि आहितं', अग्गाणि—वराणि रयणाति वणिग्भिरानीतानि धारयंति शतसाहस्राण्यनर्घ्याणि वा राजान एव धारयंति, तत्तुल्या तत्प्रतिमा वा, कियन्तो लोकेऽस्ति वणिजः क्रायिका वा, एवं परमाणि महव्वयाणि रत्नभूतान्यतिदुर्द्धराणि तेषामल्पा एवोपदेष्टारो धारयितारश्च,'जे इह सायाणुगा णरा' वृत्तं ॥१४६॥ जे इति अणिद्दिट्ठस्स णिद्देसे सायं अणुगच्छंतीति सायाणुगा—इहलोगपरलोगनिरवेक्खा, एवं इड्ढिरससायागारवेसु 'अज्झोववण्णा' अधिकं उपपण्णाः अज्झोववण्णा तस्मिन्नेव सोतिंदियादिए इच्छामदणकामेसु वा मुच्छिता—गिद्धा गढिता अज्झोववण्णा,'किमणेण समं पगब्भिता' ते हि अइयारेसु पसज्जमाणा यदा

परैश्चोद्यंते तदा ब्रुवते–किमनेन स्वल्पेन दोषेण भविष्यति?, वितथं वा दुष्पडिलेहितदुब्भासितअणाउत्तगमणादि, एवं थोवे थोवं पावमायरंता पदे पदे विसीदमाणा सुबहून्यपि पापान्याचरंति, उक्तं च–'करोत्यादौ तावत्सघृणहृदयः किंचिदशुभं०' दिट्ठंतो जहा एगस्स सुद्धे वत्थे पंको लग्गो, सो चिंतेति–किमेत्तियं करिस्सतित्ति, तत्थेवाज्झवसितं, एवं वितियं मसिखेलसिंघाणगसिणेहादीहि सव्वं मइलीभूतं, अथवा मणिकोट्टिमे चेडरूवेण सण्णा वोसिरिता, सा तत्थेव घट्टा, एवं खेलसिंघाणादीणिवि कताणि, किं करिस्संतित्ति तत्थव तत्थेव घट्टाणि जाव तं मणिकोट्टिमं सव्वं लेक्खादीहि–श्लेष्मादिभिः मलिनिभूतं दुग्गंधिगं च जातं, भद्दगमहिसोवि एत्थ दिट्ठंतो भाणितव्वो, आचंलक्खो राया दिट्ठंतो य, एवं पदे पदे विसीदंतो किमणेण दुब्भासितेण वा स्तोकत्वादस्य चरित्तपडस्स मलिणीभविस्मति जाव सव्वो चरित्तपडो मइलितो, अचिरेण कालेण चरित्तमणिकोट्टिमं वा 'णवि जाणंति समाहिमाहितं' ते हि णिच्छयणयतो अण्णाणिणो चेव लब्भंति, पदे पदे विसीदत्तणा जया साधम्मिएहिं परेहिं वा चोइता भवंति तदा 'वाहेण जहा व विच्छते' वृत्तं ॥ १४७ ॥ वाहो णाम लुद्धगो तेण सरेण तालितो मृगोऽन्यो वा स तेण ताव परद्धो यावत् श्रान्तश्चत्वारिवि पादे विन्यस्य व्यवस्थितः ततो मरणं चाप्तः, अयं तु सौत्रो दृष्टान्तः, वाहेण जहा वच्छते, वाहतीति वाहः—शाकटिकोऽन्यो वा 'यथे'ति येन प्रकारेण तेन वाहेन विषमतीर्थश्रान्तो वा अवहन् प्रतोदेन विविधं क्षतः, अबलो नाम क्षीणबलः, भरोद्वहनं श्रान्तो वा, गच्छतीति गौः, भृशं चोदितः, चोद्यमानोऽपि न शक्नोत्युद्वोढुं, जेण तस्य तहिं अप्पथामता 'तस्से'ति तस्य गोः तस्मिन्निति पांशुनिकरे विषमे वा, अप्पथामया णाम जेण अवहंतो तोत्तगप्पहारे सहति, जइ थामवं होन्तो तो ण तुत्तगप्पहारे सहंतो, सव्वत्थाप्यचयंतो खलु से तीक्ष्णैः प्रतोदाग्रैः तुद्यमानो अवसीदति, अथवा से 'अन्तए' अन्त्यायामप्यवस्थायां अन्तशः

भावमार्गा अपि दुःखावहा एव ते, सम्यग्दर्शनज्ञानतपोमयस्तु प्रशस्तभावमार्गः, शुद्धः सर्वदुःखविमोक्षणः, तमेवंविधं जाणेहि णं जहा भिक्खू यथेति येन प्रकारेण, भिक्षुरिति भगवानेव, यथा स भिक्षुर्ज्ञानवान् तथाभूतं त्वमपि जानीषे तमेवं जानीते, अथवा हे भिक्षो! तमेवं ब्रूहि महामुणी, हे महामुने, स्वात्किमर्थमहं पृच्छामि ?, तत उच्यते–'जइ मे केइ पुच्छेज्जा०'सिलोगो ॥४९९॥ देवाश्चतुष्प्रकाराः एते प्रच्छाक्षमा भवंति, तिरिया मणुस्सा, उत्तरगुणलद्धि वा पडुच्च तिर्यं अपि, कश्चित् गिरा वत्ति वयसावि पुच्छेज्ज, तेसिं तु कतरं मग्गं तेषामजानकानां स्वयमजानकः कतरं मार्गं कथं वा ? कथयिष्यामि, अव्याबाधसुखादीनि आवहतीति सुखावहः, अथवाऽभ्युदयकं निःश्रेयसं च, इति पृष्ट आर्यसुधर्म्मा जम्बूस्वाम्याद्यान् साधून् प्रणिधाय सदेवमणुआसुरं च परिसं णिस्साए कहेति 'जइ वो केइ०'वृत्तं ॥५००॥ जइ वा केइ पुच्छेज्जा, जतित्ति अणिद्दिट्ठणिद्देसे, संसारभ्रांतिनिव्विण्णा देवा अदुव माणुसा। तेसिं तु इमं मग्गं आइक्खेज्ज सुणेध मे, पठ्यते च तेसिं तु पडिबो(सा)हेज्जा मग्गसारं सुणेह मे, साहितं प्रति अन्येषां साहंति–कथितं सत् पडिसाहेज्जा, मार्गाणां सारः मार्गसारः।'अणुपुव्वेण०'सिलोगो ॥५०१॥ कथं मार्ग-प्रतिपत्तिरेव तावद्भवति ?, उच्यते, अणुपुव्वेण महाघोरं, अणुपुव्वेणंति 'माणुस्स खेत्त जाती०'गाथा, अथवा 'चत्तारि परमंगाणि' सिलोगो, अथवा 'पढमिल्लुगाण उदये' गाथाओ तिण्णि, एवं 'कम्मक्खयाणुपुव्वि०'गाथा, जाव 'बारसविधे०' दुरन्तत्वात् महाघोराः, अणुपुव्वेमिः दुस्तरं, महापुरिसा सुघोरमपि तरंति, घोरसंग्रामप्रवेशवत्, कासवेण पवेदितं प्रदर्शितमित्यर्थः, जमादाय इतो पुव्वं जं आयाय इति यमनुचरित्वा, इत इति इतस्तीर्थादवाक्, अद्यतनाद्वा दिवसादिति, समुद्रेण तुल्यं समुद्रवत्, व्यवहरंतीति व्यवहारिणः वणिजः, यथा तेऽतिक्रान्ते काले समुद्रं 'अतरिंसु०' सिलोगो ॥५०३॥ अतरिष्यन् तरंति तरिष्यन्ति

च, तद्वत्सम्यग्मार्गमनुचर्य तीतद्धाए अणंता जीवा संसारौघमतरिंसु संख्येयाः तरंति साम्प्रतं अणंता तरिस्संति णागतंति, तं मोक्षा, तमहं श्रुत्वा भवदादीन् श्रोतॄन् प्रति वक्ष्यामि, जायंति जन्तवः, जम्बूस्वाम्यादीनां आमन्त्रणं हे जन्तवः !, **तं सुणेह मे** चरित्तमग्गं आइक्खिस्सामि, नन्दन(ज्ञानदर्शन)मार्गावपि तदन्तर्गतावेव, जेसु संजमिज्जति ते इमे, तंजहा–**'पुढवी जीवा पुढो सत्ता०'** सिलोगो ॥५०३॥ पृथक् इति प्रत्येकशरीरत्वात्, **आउजीवा तहा अगणी पुढो सत्ता** इति वर्त्तते, तेण रुक्खग्गहणेणं भेदो दरिसिते **'अहावरे०'**सिलोगो ॥५०४॥ अहावरे तसा पाणा, एतं छक्काय आहिया, एतावता जीवकाए, न हि असद्भूतो विद्यते जीवः ?, कायाः एते, **'सवासिं अणुजुत्तीहिं'** सिलोगो ॥५०५॥ अनुरूपा युक्तिः, जहा **'पुढवीए णिक्खेवो परूवणा लक्खणं परीमाणं। उवओए सत्थे वेदणा य चवणा णियत्ती य ॥१॥'** किंच–अङ्कुरवज्जीवत्वं पार्थिवानां विद्रुमलवणोपलादयः स्वस्वाश्रयावस्थाः सचेतनाः, कुतः ?, समानजातीयांकुरसद्भावात्, अर्शोविकाराङ्कुरवत्, **'भूमिक्खयसाभावियसम्भवतो दद्दुरं जलमुत्तं। अथवा मच्छो व सभाववोमसंभूतपातातो ॥१॥** सात्मकं तोयं भौम, कुतः ?, समानजातीयस्वभावसम्भवात् दद्दुरवत्, अथवा अन्तरीक्ष्यमपि अभ्रादिविकारस्वभावसंभूतपातान् मन्स्यवत्, ग्रहणवाक्यं, इतरसंयोगात्तेजसां, तेजः सात्मकं आहारोपादाना उद्वृत्तनिशेषोपलब्धेः हद्विकारदर्शनाद् पुरुषवत्, ग्रहणवाक्यं, गतिमत्त्वाद् वायुर्जीवः प्रयत्नगतेः, यस्मादयं सविक्रम इव पुमान् तीव्रमन्दमध्यान् गतिविशेषान् स्वेन महिम्ना श्रयतीति, वेगवत्त्वाच्च वृक्षादीन् उन्मूलयति, इत्यतो गतिमत्त्वाद्वायुर्जीवः, सात्मकाश्च वनस्पतयः जन्मजराजीवणमरणसद्भावा स्त्रीवत्, आह–नन्वयमनैकान्तिको जाताद्याख्यायाः विपक्षेऽपि दर्शनात्, तद्यथा–जातं दधि जीर्णं वासः संजीवितं विषं मृतं कुसुंभकमित्यादि, उच्यते, न, वनस्पतौ समस्तलिङ्गोपलब्धेः, दध्यादाव-

समस्तदर्शनादुपचारतः जातमिति, इतश्च सात्मका वनस्पतयः, क्षतसंरोहणादाहारोपादानदौहृदसद्भावात् रोगचिकित्सासद्भावात् (अशोका)दौ सम्भवः कुष्माण्ड्यादीनां विशेषपक्षः, विशेषश्चासौ पक्षश्च विशेषपक्षः, कर्त्तव्यः, 'छिक्कापरोइता छिक्कमेत्तसंकोअतो कुलिङ्गो व। आसयसंचारातो जाणसु वल्लीविताणाइं ॥१॥' सात्मिकाः स्पृष्टप्ररोदिकादयः स्पृष्टाकुंचनात्कीटवत् आश्रयाभिसंसर्पणाद्वल्ल्यादयः 'सम्मादीया सावप्पबोहसंकोयणादितोऽभिमता। बउलादयो य सद्दादिविसयकालोवलंभातो ॥१॥' शम्यादयः स्वापप्रबोधसंकोयणादिसद्भावात्, शब्दादिविषयोपलम्भात् वकुलासार(शो)कादयो देवदत्तवत्, एवमाद्याभिस्रसानुरूपाभिः सुयुक्तिभिः एगिंदिए पडिलेहिय जधेति जीवहिंसोपरतिः कार्या स्वकामतः अज्झोवगमियाओवक्कमियाओ वेदणाओ भणितव्वाओ, तत्थ मणुस्सपंचेंदियतिरियाण य दुविधा, सेसाणं उवक्कमिया, एवं मतिमं पडिलेहिता सव्वे अक्कंतदुक्खा य सारीरमाणसं अथवा सव्वेसिं अणिट्ठं अकंतं अपियं दुक्खं अत इत्यस्मात्कारणात् नवकेण भेदेन अहिंसणीया अहिंसका 'एतं खु णाणिणो सारं०'सिलोगो ॥५०६॥ न हि ज्ञानी ज्ञानादर्थान्तरभूत इतिकृत्वाऽपदिश्यते—एतं खु णाणिणो सारंति, कोऽर्थः ?, एष हि ज्ञानस्य सारः जं ण हिंसति कंचणं कञ्चनमिति केनचदपि भेदेन, अहिंसा समयंति समता 'जह मम ण पियं दुक्खं०'गाथा, अथवा यथा हिंसितस्य दुःखमुत्पद्यते मम एवमभ्याख्यातस्यापि, चोरियातो वाऽस्य दुःखमुत्पद्यते, एवमन्येषामपि इत्यतो अहिंसासमयं चेव, अथवा दव्वओ खेत्तओ कालओ भावओ हिंसा भवति, एवं शेषान्यपि, एतावाँश्चैव ज्ञानविषयः यदुत हिंसाद्याश्रवद्वारोपरतः, क्षेत्रप्राणातिपातं तु प्रतीत्यापदिश्यते, 'उड्ढमहं तिरियं च०' सिलोगो ॥ ५०७ ॥ प्रज्ञापकं प्रतीत्य उड्ढं अहं तिरियं च पूर्ववत्, सव्वत्थ विरतिं कुज्जा इहापि तावत् निव्वाणं भवति, कथं ?, अहिंसकोऽयं न हि हिंसक इव सर्वस्योद्वेजको भवति, उपशान्तवैरत्वाच्च न कस्य-

चिदपि विभेति, किंच-तणसंथारणिवण्णोऽवि मुणिवरो भट्टरागमयदोसो।'किम्?, मोक्खो,एवं निर्वाणं भवतीत्याख्यातं, 'पभू दोसे णिराकिच्चा०' सिलोगो ॥ ५०८॥ प्रभवतीति प्रभुः, वश्येन्द्रिय इत्यर्थः, न वा संयमावरणानां कर्मणां वशे वर्त्तते, अथवा स्वतंत्रत्वात् जीव एव प्रभुः, शरीर हि परतन्त्रं, मोक्षमार्गे वाऽनुपलायितव्या प्रभुदोषाः क्रोधादयः, निरा इति पृष्ठतः कृत्वा, ण विरुज्झेज्ज केणइ न विरुध्येत केनचिदिति, अपि पूर्वशत्रूणामपि, अपि हास्येनापि विरोधे विग्रहः घंत इत्यर्थः, यद्वा यस्य प्रतिकूलं, मणसा वयसा चेवत्ति नवकेन भेदेन अन्तश इति यावज्जीवितान्तः, उक्ता मूलगुणाः। उत्तरगुणप्रसिद्धये त्वपदिश्यते 'संवुडे य महापण्णे' सिलोगो ॥ ५०९॥ हिंसाद्याश्रवसंवृत्तः इंदियभावसंवुडो वा, महती प्रज्ञा यस्य स भवति महाप्रज्ञः, धीर्बुद्धिरित्यनर्थान्तरं, आहारउवधिसेज्जाउ याचितद्रव्यं एषणीयं च चरति-गच्छति तं, चर्यत इत्येकोऽर्थः, एसणासमिते णिच्चं तिविधा एसणा-गवेसणा गहणेसणा घासेसणा, एवं सेसाओवि समिईओ, तत्राधाकर्म सर्वगुरुअनेषणादोषः आद्यश्चेति तेन तन्निषेधार्थमपदिश्यते-'भूतानि समारंभ'सिलोगो ॥५१०॥ भूतानि तसथावराणि, कथमिति?, साधू निर्दिश्योपकल्पितं, तारिसं तु ण गेण्हिज्जा, एवं ओधिंपि, इत्येवं सार्वमार्गप्रतिपन्नो भवति, किंच-'पूतिकम्मं ण सेविज्जा' ॥ ५११॥ एस धम्मे वुसीमतोति, वुसिमानिति संयमवान्, वुसिमं च जं किंचि अभिसंकेज्जा सवसो तं ण भत्तए यदिति आहार उवधि सेज्जा अथवा यदिति यत्किंचित् दोषं, अभिसंकते पणवीसाए अण्णयर किमेतं एसणिज्जं अणेसणिज्जं?, सर्वश इति, यद्यपि प्राणात्ययः स्यात्, इदाणिं वायासमिती 'ठाणाइं' सिलोगो ॥५१२॥ ठाणाणि संति सड्ढीणं, श्रद्धावन्तं श्राद्धिनः, गामेसु नगरेसु वा जाव सन्निवेसेसु वा सम्मदिट्ठीणं मिच्छादिट्ठीण वा, तेहिं सड्ढेहिं पुव्वि णाम पुच्छगतो, परेणावि मिच्छादिट्ठीणा, मरुयस-

ङ्गेण तच्चणियादिसङ्गेण वा, हेट्ठाऽधो, जमिदो अम्हे बाह्मणं भिक्खुं वा तर्पयामो, तत्र कश्चिद्धम्मं च मग्गट्ठितो मग्गचिट्ठ एवं पुट्ठो अत्थि धम्मोत्ति णवत्ति ?, 'अत्थि वा' सिलोगो ॥ ५१३ ॥ अथवा णत्थि पुण्णंति, स्याद्–अनुज्ञायां को दोषः प्रतिषेधे वा ?, उच्यते–'दाणट्ठताए जे सत्ता हम्मंति तसथावरा' ॥ ५१४ ॥ तंजहा–तणणिस्सिता कट्ठगोमयणिस्सिता संसेतया तसा थावरा य हम्मंते तेसिं सिलोगो तेसिं सारक्खणट्ठाए अत्थि पुण्णन्ति णो वदे मिच्छत्तथिरीकरणं च, तेणाहारेण परिवूढा करेस्संति असंयमं अप्पाणं परं वा बहूहिं भावेंति तदनुज्ञातं भवति, पडिसेधेवि जेसिं तं उपकप्पेंति अण्णं पाणं तधाविधं। तेसिं लाभंतरायन्ति, तम्हा णत्थित्ति णो वदे॥ कंठयं, तत्र का प्रतिपत्तिः? तुसिणीएहिं अच्छितव्वं, निव्वंधे वा ब्रवीति–अम्हं आधाकम्मादिबायालीसदोसपडिसुद्धो पिंडो पसत्थो, जं च पुच्छसि किमत्रास्ति पुण्यमित्यत्रास्माकं अव्यापारः, कथं ?,उभयथा दोषोपपत्तेः, कथं ?,'जे य दाणं पसंसंति, वधमिच्छंति पाणिणं। जे य णं पडिसेधेंति, वित्तिछेदं करेंति ते' ॥५१६॥ महाभद्दारकदृष्टान्तः, सर्वैः जलचरैः स्थलचरैश्च प्रतिबोधितः, अनुज्ञायामननुज्ञायां चोभयथापि दोषः, अथवा 'ग्रसत्येको मुञ्चत्येको, द्वावेतौ नरकं गतौ' एवमुभयथापि दोषं दृष्ट्वा 'दुहओ' सिलोगो ॥ ५१७ ॥ दुहतोवि जे ण भासंति अत्थि णत्थि वा पुणो ते भगवन्तः, अयं रयस्सा एतीत्यायमं रज इति रजइत्तुं, रजसः आगमं हिच्चा णिव्वाणंति ते इत्येवं वाक्यसमितिरुक्ता, तद्ग्रहणात् सेसावि समितीओ घेप्पंति, एवं वा णिव्वाणं भवतीति, भगवंतश्च 'णिव्वाणपरमा बुद्धा' सिलोगो ॥५१८॥ णिव्वाणं परमं जेसिं ते इमे णिव्वाणपरमा एते बुद्धा अरहन्तः तच्छिष्या बुद्धबोधिताः, परमं निर्वाणमित्यतोऽनन्यतुल्यं, नास्य सांसारिकानि तानि तानि वेदनाप्रतीकाराणि निर्वाणानि, अनन्तभागेऽपि तिष्ठन्तीति दृष्टान्तः मोक्ष एव, नक्खत्ताण व चंदि-

मा न क्षयं यांतीति नक्षत्राणि तेभ्यः कान्त्या सौम्यत्वेन प्रमाणेन काशेन परमश्चन्द्रमाः नक्षत्रग्रहतारकेभ्य, एवं संसारसुखेभ्योऽधिकं निर्वाणसुक्खमिति, तम्हा सदा जते दन्ते मोक्षमार्गं पडिवण्णे उत्तरगुणेहिं वद्धमाणेहिं अच्छिण्णं संधणाए णिव्वाणं संधेजा, स एवं मिच्छत्तासंधनया निर्वाणं संधेमाणः उभयत्रापि 'वुज्झमाणाण पाणाणं' सिलोगो ॥५१९॥ संसारनदीश्रोतोभिरुह्यमानानां स्वकर्मोदयेन, ये उच्छुभं तीर्थकरत्वनाम तस्य कर्म्मण उदयात् अक्खाति साधु तं दीवं अक्खाति भगवानेव शोभनमाख्याति साधुराख्यातं, एतावता समणे वा माहणे वा जावऽत्थऽन्थुत्तरीए, दीपयतीति दीपः, द्विधा पिबति वा द्वीपः, स तु आश्वासे प्रकाशे च, इहाश्वासदीपोऽधिकृतः, यस्मादाह—उह्यमानानां श्रोतसा दीवो ताणं सरणं गति पतिट्ठा य भवति, एतदाश्वासद्वीपं प्राप्य संसारिणां प्रतिष्ठा भवति, इतरथा हि संसारसागरे जन्ममृत्युजलोर्मिभिरुह्यमानः नैव प्रतिष्ठां लभते, जं व मग्गं अणुपालेंतस्स अट्ठविधं कम्मं, प्रतिष्ठां गच्छन्ति, निष्ठामित्यर्थः, यथाऽऽख्याति तथाऽनुचरति सयं, अणुग्गहितबालविरतो जेण जीवो हिंडंतो प्रतिष्ठां लभते, एष प्रशस्तभावमार्गः इति लभ्यते, केरिसो पुण पसत्थभावमग्गगामी प्रतिष्ठां लभते ? कीदृशो वा भावाश्वासदीपो भवति ?, 'आयगुत्ते सदादंते' सिलोगो ॥५२०॥ आत्मनि आत्मसु वा गुप्त आत्मगुप्तः इंदियनोइंदियगुप्त इत्यर्थः, न तु यस्य गृहादीनि गुप्तादीनि, हिंसादीनि श्रोतांसि छिन्नानि यस्य स भवति छिन्नसोते, छिन्नश्रोतस्त्वादेव निराश्रवः, जे धम्मं सुद्धमक्खाति य एवंविधे आश्वासद्वीपे स्थितः प्रकाशद्वीपः अन्येषां धर्म्ममुपदिश्यति, प्रतिपूर्णमिदं सर्वसत्त्वानां हितं सुहं सर्वाविशेष्यं निरुपधं निर्वाहिकं मोक्षं नैयायिकं इत्यतः प्रतिपूर्णं, अथवा सर्वैर्दयादमध्यानादिभिर्धर्मकारणैः प्रतिपूर्णमिति, अनन्यतुल्यं अणेलिसं, योऽयमनन्यसदृशो धर्मोपदेशः। 'तमेव अविजानंता' ॥५२१॥ तामिति तद्विविधं प्रदीपभूतं धर्म्मं न बुद्धा-

बुद्धवादिनश्च बुद्धंमन्याश्चात्मानं बुद्धा मोत्ति य मन्नंता अण्णाणिणो अविरया तिण्णि तेसट्ठा पावाइयसया एवमस्माकं मोक्षसमाधिर्भविष्यतीति, 'दूरतस्ते समाधिए', कथमिह लोकेऽपि तावत् अनेकाग्रत्वात्समाधिं न लभते, कुतस्तर्हि परमसमाधिं?, मोक्षं, तद्यथा—शाक्याः अबुद्धा बुद्धवादिनः सुखेन सुखमिच्छंति, इहलोकेऽपि तावद् ग्रामव्यापारैर्न सुखमास्वादयंति, कुतस्तर्हि परमसमाधिसुखमिति?, उक्तं हि 'तत्रैकाग्र्यं कुतो ध्यानं, यत्राध्यानं यत्रारंभपरिग्रह'मिति, इत्यतस्ते चतुर्विधाए भावणाए दूरतः, इतश्च दूरतः 'ते य बीयोदगं चेव' सिलोगो ॥ ५२२ ॥ बीयाणि सचेतणाणि, शाल्यादीनां, सूतमिति चोदकं सचेतनमेव, हरिद्राकक्कोदकवत्, तमुद्दिश्य च कृतं उपासकादिभिः स्वयं च पाचयंति पक्षचीरिकादयः, तेषां हि पक्षे चारिका भवंति, अनुज्ञाते च सुपक्वं सुभृष्टमिति, जीवेषु च अजीवबुद्धयः अतत्त्वे तत्त्वबुद्धयः वराकास्तत्कारिणस्तद्वेषिणश्च संघभक्तानि गणयंतोऽतीतानागतानि च प्रार्थयन्तः झाणं णाम झियायन्ति णाम परोक्षस्तवादिषु तेऽपि नाम यदि ध्यायंति, को हि नाम न ध्यानं ध्यायति 'ग्रामक्षेत्रगृहादीनां, गवीश्वेष्यजनस्य च। यत्रप्रतिग्रहो दृष्टो, ध्यानं तत्र कुतः शुभम्?'॥१॥ इति, सचित्तकम्मा य तेसिं आवसहा, विहारकुडीउत्ति, मांसं कल्पिक इत्यपदिश्यते, दासी उ कप्पया रीउत्ति, यथा बर्ब्बरेण मांसस्य प्रत्याख्यानं अशक्नुवता तमनुग्रासयितुं भगमिति संज्ञाकृत्वा भक्षितं, किमसौ तद्भक्षयं निर्विशंको भवति?, लूता वा शीतलिकाभिधानेनाभिलप्यमाना किन्न मारयति?, एवं तेषां न संज्ञान्तरि परिकल्पितास्ते आरंभा निर्माणाय भवंति, न च वैराग्यकरा भवंति, येऽपि तावद्भिक्षाहारा भवंति तेऽपि सविकारस्त्रीरूपसचित्तकर्म्मसु लेनेषु वसंति तेषामपि तावत्कुतो वा ध्यानं?, किमंग पुनः कल्पिकारीव्यापारयन्तः पचनयाचनाप्रवृत्ताः, ता तनुमेव वानुप्रेक्षमाणानां कुतो ध्यानं?, न हि मोक्षमार्गस्य ध्यानस्य च शुद्धस्य अखेत्तण्णा अजाणगा, अस-

माहिता णामासंवृत्ता, मनोज्ञेषु पानभोजनाच्छादनादिषु नित्याध्यवसिताः, कोऽत्थ संघभत्तं करेज्ज ? कोऽत्थ परिक्खारं देज्ज वस्त्राणि इत्येवं नित्यमेवार्त्तं ध्यायंति 'जहा ढंका' सिलोगो ॥ ५२३ ॥ जहा ढंका य कंका य पिलजा जलचरपक्षजाति खे मग्गुकाः काकमंगुवत् शिखी च जलचराः, एवं एते हि न तृणाहाराः, केवलोदकाहारवत् ते नित्यकालमेव मच्छेसणं झियायंति निश्चलास्तिष्ठंति जलमध्ये उदगमक्खोभेन्ता मा भून्मत्स्यादयो नक्ष्यंति उकसिष्यंते वा 'एवं तु समणा एगे'सिलोगो ॥ ५२४ ॥ एवंपि नाम श्रवणा वयं इति ब्रुवन्तः एके न सर्वे पचनादिषु आरंभेषु अशुभाध्यवसायेनैव वर्त्तमाना मिथ्यादृष्टयः चरित्तअणारीया आहारं परपूजासत्कारांश्च ध्यायंति सन्मार्गाजानकाः कुमार्गाश्रिताः मोक्षमिच्छंति, अपि संसारसागरे एव निमज्जंतो दृश्यन्ते 'जहा आसाविणी णावं'सिलोगो ॥५२६॥ आश्रवतीत्याश्राविनी—सदाश्रवा शतच्छिद्रा, नयति नीयते वाऽतो, जाति य, एव जात्यन्धः पूर्वापरदक्षिणोत्तराणां दिशामार्गाणां गतेः गन्तव्यस्यानभिज्ञः एतावद्गतं एतावद् गन्तव्यं इच्छेज्जा पारमागंतुं अंतरा एव नदीमुखे पर्वते वा प्रतिभग्ने निमग्ने वा पोते अंतरा इति अप्राप्त एव पारं विसीदंति, एष दृष्टान्तोऽयमर्थोपनयः—'एवं तु समणा एगे'सिलोगो ॥५२७॥ एगे, ण सव्वे, अण्णाणमिच्छत्ततमपडलमोहजातपडिच्छन्ना, अणारियाणाम अणारियचरित्ता, सोतं कसिणमावण्णा, श्रवतीति श्रोतः आश्राविनीनौ श्वानीय कुचरिकश्रोतमास्थाय कसिणमिति सम्पूर्णं कर्म ततो भवति, तदभावे तु न शेषाः आश्रवाः, यद्वाऽपि भवंति तथापि न सर्वा उत्तरप्रकृतयो बध्यन्ते, न वा सम्पूर्णाः, यस्मादुक्तं 'सम्मदिट्ठी जीवो', अथवा कसिणद्रव्यश्रोतः प्रावृषि वर्षासु वा नदीपूरः, एवं मिच्छत्तसहगता जोगा कसाया वा संपुण्णभावसोतं भवति, त एवं सोतमावण्णा आगंतारो अहब्भयमिति संसारश्च जातिजरामरणबहुलो, तजहा—गब्भातो गब्भं जम्मतो

जम्मं मारओ मारं दुक्खओ दुक्खं, एवं भवसहस्साइं पर्यापारितं बहून्यपि, पसत्थं चेव पसत्थभावमग्गो वण्णिज्जमाणो, पुव्वं वुत्तं जंकिंचि अभिसंकिज्ज सव्वसोतं ण भोत्तए एस उस्सग्गमग्गे इत्यादि, अतिप्रसक्तं लक्षणं निवार्यते, सर्वस्योत्सर्गापवादः, यथा चोत्सर्गः काश्यपेन प्रणीतः तथाऽपवाद इत्यतोऽपवादसूत्रं प्रारभ्यते, प्रत्ययश्च शिष्याणां भविष्यति यथाऽस्त्यपवादोऽपीति तेन तमाचरंतो नामाचारमात्मानं मंस्यते, तच्च शास्त्रमेव न भवति यत्रोत्सर्गापवादौ न स्तः तेनापदिश्यते–'इमं च धम्ममादाय'सिलोगो ॥५२८॥ धर्ममादाय धर्मं फलं च तीर्थकरः काश्यपः स एवं भगवान् किं प्रवेदितवान् ?–कुज्जा भिक्खू गिलाणस्स पूर्ववत्, किंच–संखाय पेसलं धम्मं संख्यायेति ज्ञात्वा, पेसलं इति सम्पूर्णं, द्रव्यपेसलं धम्मं यद् द्विभेदं सुन्दरं मांसं, भावपेशलस्तु ज्ञानदयादिभिः सर्वैर्धर्मकारणैः सम्पूर्णो धर्म एव, तं ज्ञात्वा दृष्टिमानिति सम्यग्दृष्टिः, संख्याग्रहणा धर्मग्रहणा(ज्ञानं धर्मग्रहणाचारित्रं) दृष्टिग्रहणात्सम्यग्दर्शनं, एवं त्रीण्यपि सम्यग्दर्शनज्ञानचारित्राणि गृहीतानि भवंति, तरे सोतं महाघोरं मार्ग एवानुवर्त्तते, तराहि सोतं महाघोरं, श्रवन्तीति श्रोत्रं, द्रव्ये भावे च जातिजरामरणाप्रियसंवासादिभिर्महाघोरं भावश्रोतः संसार अत्तत्ताएवित्ति अत्ताणं तरंतो परिव्वएज्जासि तमेव तरति 'विरते गामधम्मेहिं' सिलोगो ॥ ५२९॥ ग्रामधर्माः शब्दादयो, जे केइ जगती जगति जायत इति जगत् तस्मिन् जगति विद्यन्ते ये, जायन्त इति वा जगाः–जन्तवः, तेसिं अत्तुवमाणेण तेषां आत्मोपमानेन–आत्मौपम्येन, कोऽर्थः ? 'जह मम ण पियं दुक्खं०'धीमं कुव्वं परिव्वए'त्ति संयमचारियं भवति 'अतिमाणं च'सिलोगो ॥५३०॥ अथवा संयमवीरियस्स इमे विग्घकरा भवंति, तंजहा–अतिकोधो अतिमाणो अतिमाया अतिलोभो इत्यतः अतिमानं च मायां च, अतिक्राम्यते येन चारित्रं सोऽतिमाणं, अप्रशस्त इत्यर्थः, प्रशस्तोऽपि न कार्यः, किंतु तत्क्रि-

यार्थमेव क्रियते, रजककूपखातकदृष्टान्तसामर्थ्यात्, यथा रजको मलदिग्धानि वस्त्राणि प्रक्षालयन् शुद्ध्यर्थं अन्यदपि मल औषधादिकं समादत्ते, एवं साधुरपि, कूपेऽप्येवं, न च नामावीतरागस्य मानादयो नोत्पद्यन्ते, ते त्वप्रशस्ताः, तेवि नरेण न कार्याः, एवं शेषा अपीति। दुविधाए परिण्णाए परिजाणाहि, किंच–ये केचित् क्रोधमानमायालोभाद्यन्यदपि दोषजातं **सव्वमेतं निराकिच्चा**, सव्वं निरवशेषं तं, एतदिति यदुद्दिष्टं, निरमिति स्पृष्टं, णिव्वाणं अच्छिण्णसंधणाए संधए, किंच–'**संधए साधुधम्मं वा**' सिलोगो ॥५३१॥ दसविहो चरित्तधम्मो णाणदंसणचरित्ताणि वा तं अच्छिन्नसंधणाए, णाणे अपुव्वगहणं पुव्वाधीतं च गुणाति, दंसणे णिस्संकितादि, चरित्ते अखंडितमूलगुणो, पठ्यते च–'**सद्दहे साधुधम्मं च**' पावधम्मो अण्णाणअविरतिमिच्छत्ताणि, अथवा पावाणं धम्मो, पापा मिथ्यादृष्टयः सर्वे गृहिणोऽन्यतीर्थिकाश्च, तेसिं धम्मं–सभावं, निराकुर्यादिति पृष्टतः कुर्यात्, तत्केन कुर्यात् को वा कुर्यादिति?, उच्यते, **उवधानवीरिए भिक्खू** उपधानवीर्यं नाम तपोवीर्यं स उपधानवीर्यवान् भिक्षू **कोधं माणं न पत्थये न कुज्झेत न माद्येत**, न क्रोधमिच्छेदित्यर्थः, अक्रोधं तु प्रार्थयेत्, एवं शेषेष्वपि, स्यात् किमेवं वर्द्धमानस्वामी एतन्मार्गमुपदिष्टवान् उतान्येऽपि तीर्थकराः?, उच्यते, '**जे य बुद्धा अतिक्कंता**'सिलोगो ॥५३२॥ अतिक्कंता अतीतद्धाए अणंता, एतन्मार्गमुपादिक्ष्यंत, आचार्या वा मोक्षमिताः, साम्प्रतं पचदशसु कर्म्मभूमीषु संख्येया, अणागतद्धाए जे य बुद्धा अणागता संतित्ति **संति पतिट्ठाणं** गमनं शान्तिश्चारित्रमार्ग इत्यर्थः, एषा शान्तिः तेषां प्रतिष्ठा नामाधारः आश्रय इत्यर्थः प्रतिष्ठानं प्रतिष्ठा निर्वाणं वा शान्तिः तेषां प्रतिष्ठानि, को दृष्टान्तः?–**भूयाणं जगई जहा** जगतीनाम पृथिवी, यथा सर्वेषां स्थावरजङ्गमानां जगती प्रतिष्ठानं तथा सर्वतीर्थकराणामपि एष एव शान्तिमार्गः प्रतिष्ठानं प्रतिष्ठा, '**गहणं व तमावण्णं**'

सिलोगो ॥५३३॥ अथ पुनस्तं व्रतानि आपण्णं चारित्रमार्गप्रयातमित्यर्थः, पछते-अथेनं भेदमावण्णं भावभेदो हि संयम एव, कर्म्माणि भिनत्तीति भेदः फासा सीतउसिणदंशमशकादयः उच्चावचा अनेकप्रकाराः परीषहोपसर्गाः स्पृशेत् ण तेहिं विणिहम्मेज्जा ण तेहिं उदिण्णेहिवि णाणदंसणचरित्तेसुं जत्ताओ मग्गाओ विणिहण्णेज्जा, पुव्वीए जिणेत्ता संयमवीरियं उपादेज्जासित्ति, जहा ते गुरुगावि उदिण्णा लहुगा भवन्ति, दृष्टान्तः—आभीरयुवत्ति, जातमेत्तं वच्छगं दुण्णि वेलाए उक्खिविऊण णिक्खामेति, पीतं चैनं पुनः प्रवेशयति, तमेव क्रमशो वर्द्धमानं अहरहर्जयं कुर्वता जाव चउहायणंपि उक्खिवति, एष दृष्टान्तोऽयमर्थोपनयः—एवं साधुरपि सन्मार्गात् क्रमशो जयति उदीर्णैरपि परीषहैर्न विहन्यते, वातेण व महागिरिरिति मन्दरः संवुडे सि महापण्णे' सिलोगो ॥५३४॥ स एवं संवरसंवृतः प्रधानप्रज्ञः विस्तीर्णप्रज्ञो वा, दधाति वृद्ध्यादीन् गुणानिति वुद्धा, पाठान्तर धीरं, दत्तं एसणं चरेज्जासित्ति दत्तेसणं चरे, अथवा दत्तमेषणीयं च यश्चरति स भवति दत्तेषणचरः, णिव्वुडे कालमाकंखी शान्तसमितो णिव्वुडः शीतभूत इत्यर्थः, कालं कांक्षतीति कालकंखी, मरणकालमित्यर्थः, कोऽर्थः?—तावदनेन सन्मार्गेण अविश्रामं गन्तव्यं यावन्मरणकालः, एवं केवलिणो मतंति, जं तुमे अज्जजंबू पुच्छिते 'कतरे मग्गे' तदेतस्य केवलिनो मार्गाभिधानं कथितमनन्तरमाख्यातमिति ॥ इति मार्गाध्ययनं ॥

समोसरणंति अज्झयणस्स चत्तारि अणुओगदारा, अधियारो किरियावादिमादीहिं चउहिं समोसरणेहिं, णामणिप्फण्णे णिक्खेवो गाथा 'समोसरणंमिवि छक्कं' गाथा ॥११६॥ वइरित्तं दव्वसमोसरणं सम्यक् समस्तं वा अवसरणं, तं तिविधं—सचित्तं दुपदादि यत्रैकत्र बहवो द्विपदाः वा बहवो मनुष्या समवसरंति तं सचित्तं दव्वसमोसरणं दुपदसमोसरणं, जहा साधुसमो-

सरणं, चतुष्पदानां निर्वाणादिषु गवादीनां समोसरणं, अपदानां नास्ति स्वयं समोसरणं, गत्यभावात्, सहजानां वा स्वयमपि भवति वृक्षादीनां समोसरणं, अचेतनानां अभ्रादीनां, खेत्तसमोसरणं जंमि खेत्ते समोसरंति द्रव्याणि, **जहा साधुणो आणंदपुरे समोसरंति, कालसमोसरणं वैसाहमासे जत्ताए समोसरंति**, वासासु वा जत्थ समोसरंति, तहा पक्खिणो दिवाचरा वनखंडमासाद्य समवसरंति। **'भावसमोसरणं पुण०'**गाथा ॥११७॥ तिण्णि तिसट्ठा पावादियसयाणि णिग्गंथे मोत्तूण मिच्छादिट्ठिणोत्तिकाऊण उदइए भावे समोसरन्ति, इंदियादि पडुच्च खओवसमिए भावे समोसरंति, पारिणामि जीवत्तं, एतेसु चेव तीसु भावेसु तेसिं सन्निवातिओ भावो जोएतव्वो, सम्मदिट्ठीकिरियावादी तु छसुवि भावेसु, उदइए भावे अण्णाणमिच्छत्तवज्जासु अट्ठसुवि कम्मगतीसु समोसरंति, एवं चरित्ताचरित्ती य जोएयव्वा, उवसमिएवि भावे समोसरंति, उवसामगं पडुच्च उपसममङ्गीकृत्य, यदुक्तं भवति–अस्मिन्नेव भंगद्वये भवंति, खओवसमिएवि भावे समोसरंति अट्ठारसविधे खओवसमिए भावे, तद्यथा–ज्ञानाज्ञानदर्शनदानलब्ध्यादयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च, णाणं चउव्विहं–मतिसुतओहिमणपज्जवाणि, अण्णाणं मतिअण्णाणं सुतअण्णाणं विभंगणाणं, ज्ञानाज्ञानमित्यत्राज्ञानमिति यदुक्तं तदेकभावापकर्षमङ्गीकृत्य, यद्वा सामान्येऽन्ये च, केवलिनो वा वदंति, दरिसणं तिविधं–चक्खु अचक्खु अवधिदंसणमिति, लब्धिः पञ्चविधा–दानलाभभोगोपभोगवीरियलद्धी इति, संमत्तं चरित्तं संयमासंयम इत्येतेऽष्टादश क्षायोपशमिका भावा भवंति, णवविधे खाइगे भावे समोसरंति, तद्यथा-'ज्ञानदर्शनलाभभोगोपभोगवीर्याणि च', णाणं–केवलणाणं, दंसणं केवलदंसणं, दाणलाभभोगोपभोगवीर्यमित्येतानि सम्यक्त्वचारित्रे च नव क्षायिका भावा भवन्ति, परिणामिएऽवि अणातियपरिणामियगे भावे समोसरंति, एवं सन्निवातिगेवि सण्णिकासो ओदयिकादयो द्विकादिधारणिकाः। अथवा

भावसमोसरणं चतुर्विधं, तंजहा–किरियावादी अकिरियावादी अणाणीयवादि वेणइवादी, **'अत्थित्ति किरियावादी'** गाथा ॥ ११७॥ तत्थ किरियावादी अत्थी आयादि जाव सुचिण्णाणं कम्माणं फलविवागो, तत्थावि ते मिच्छादिट्ठी चेव, जैनं शासनं अनवगाढा, तद्विधर्म्मवादिनो अकिरियावादिणो, तंजहा—णत्थि मातादि जाव णो सुचिण्णाणं कम्माणं सुचिण्णा फलविवागा भवंति, अणाणीवादित्ति किं णाणेण पढितेण ? सीले उज्जमितव्वं, ज्ञानस्य हि अयमेव सारः, जं शीलसंवरः, सीलेन हि तपसा च स्वर्गमोक्षे लभ्येते, वेणइयवादिणो भणंति–ण कस्सवि पासंडिणोऽस्स गिहत्थस्स वा णिंदा कायव्वा, सव्वस्सेव विणीयविणयेण होयव्वं।**'असियसयं किरियाण'**गाथा ॥११९॥ तंजहा–**'णत्थि ण णिच्चो ण कुणइ कतं ण वेदेइ णत्थि णिव्वाणं'** सांख्यवैशेषिका ईश्वरकारणादि अकिरियवादी, चउरासीइ तच्चणिगादि, क्षणभंगवादित्वात्तु क्षणवादिणः, अण्णाणीयवादीणि सत्तट्ठी, ते तु मृगचारिकाद्या, वेणइयवादीण छत्तीसा दाणामपाणामादिप्रव्रज्या, **तेसि मताणुमतेणं पण्णवणा वण्णिता इहज्झयणे। सब्भावणिच्छयत्थं समोसरणं आहु तेणंति** ॥१२०॥ तेषां क्रियावाद्यादीनां यद्यस्य मतं यस्यानुमतं तेषां समवायेन त्रीणि त्रिषष्टानि प्रावादुकशतानि भवति, तद्यथा–आस्तिकमतमात्माद्या नित्यानित्यात्मिका नव सं(भवं)ति। कालनियतिस्वभावेश्वरात्मकृतितः स्वपरसंस्थाः ॥ १ ॥ १८०, एवं असीतं किरियावादिसतं, एएसु पदेसु णवित्ति नव, जीव अजीवा आसव बंधो पुण्णं तहेव पावंति। संवरणिज्जरमोक्खा सब्भूतपदा णव हवंति ॥ १ ॥ इमो सो चारणोवाओ–अत्थि जीवः स्वतो नित्यः कालतः १, अत्थि जीवो सतो अणिच्चो कालतो २, अत्थि जीवो परतो निच्चो कालओ ३, अत्थि जीवो परतो अणिच्चो कालओ ४ अत्थि जीवो सतो णिच्चो णियतितो ५, एवं णियतित्तो स्वभावतो ईश्वरतः आत्मनः एते पंच चउक्का वीसं, एवं अजीवादिसुवि

वीसं वीसं, एताओ णव वीसाओ आसीतं किरियावादिसतं भवति। इदाणिं अकिरियावादि-कालयदृच्छानियतिस्वभावेश्वरात्मनश्चतुरशीतिः। नास्तिकवादिगणमतं न संति सप्त स्वपरसंस्थाः ॥१॥ इमेनोपायेन-णत्थि जीवो सतो कालओ १, णत्थि जीवो परतो कालओ २, एवं यदृच्छाएवि दो २ णियतीएवि दो २ इस्सरतोवि दो २ स्वभावतोऽपि दो २, सर्वेऽवि बारस, जीवादिसु सत्तसु गुणिता चतुरसीति भवंति। इदाणिं अण्णाणिय-अज्ञानिकवादिमतं नव जीवादीन् सदादिसप्तविधान्। भावोत्पत्तिः सदसत् द्वेधाऽवाच्यं च को वेत्ति ? ॥१॥ ६७, इमे सत्तट्ठिविधाणा-सन् जीवः को वेत्ति ? किं वा णातेण ? १, असन् जीवः को वेत्ति ? किं वा तेण णातेण ? २ सदसन् जीवः को वेत्ति किं वा तेण णातेण ? ३ अवचनीयो जीवः को वेत्ति किं वा तेण णातेण ? ४ एवं सत् अवचनीयः ५ असत् अवचनीयः ६ सदसत् अवचनीयः ७, अजीवेऽवि ७, आश्रवेवि ७ संबंधेवि ७ पुण्णेवि ७ पावेवि ७ संवरेवि ७ णिज्जराएवि ७ मोक्खेवि ७, एवमेते सत्त णवगा सत्तट्ठी, इमेहिं संजुत्ता सत्तसट्ठी हवंति, तंजहा-सन्ती भावोत्पत्तिः को वेत्ति ? किं वा ताए णाताए ? असती ? भावोत्पत्तिः को वेत्ति ? किं वा ताए णाताए ? २ सदसती भावोत्पत्तिः को वेत्ति ? किं वा ताए णाताए ? ३ अवचनीया भावोत्पत्तिः को वेत्ति ? किं वा ताए णाताए ? ४, उक्ता अज्ञानिकाः। इदाणिं वैनयिको-वैनयिकमतं विनयश्चेतोवाक्कायदानतः कार्यः। सुरनृपतियतिज्ञातिनृस्थविराधमातृपितृषु सदा ॥१॥ सुराणां विनयः कायव्वो, तंजहा-मणेणं वायाए काएणं दाणेणं, एवं रायाणं ४ जतीणं ४ णाणी(ती)णं ४ थेराणं ४ किवणाणं ४ मातुः ४ पितुः ४, एवमेते अट्ठ चउक्का बत्तीसं, सव्वेवि मेलिया तिण्णि तिसट्ठा पावादिगसता भवंति, एतेसिं भगवता गणधरेहि य सब्भावतो निश्चयार्थं इहाध्ययनेऽपदिश्यते, अत एवाध्ययनं समवसरणमित्यपदिश्यते, ते पुण तिण्णि तिसट्ठा पावादिगसता इमेसु दोसु ठाणेसु

समोसराविज्जंति, तंजहा–संमवादे य मिच्छावादे य, तत्थ गाथा 'सम्मदिट्ठी किरियावादी' गाथा ॥ १२१ ॥ तत्र किरियावादित्तेऽपि सति सम्मदिट्ठीणो चेव एगे सम्मदिट्ठीवादी, अवसेसा चत्तारिवि समोसरणा मिच्छावादिणो, अण्णाणी अविरता परस्परं विरुद्धदृष्टयः, तेण मोत्तूण अकिरियावादं संमावादं लद्धूण विरतिं च अप्पमादो कायव्वो जहा कुदंसणेहिं ण छलिज्जसि, तेण धम्मे भावसमाधीए भावमग्गे अ घडितव्वमिति, णामणिक्खेवो गतो, सुत्ताणुगमे सुत्तं, अभिसंबंधो अज्झयणं अज्झयणेण तेण णिव्वुडेण पसत्थभावमग्गो आमरणन्ताए अणुपालेतव्वो, संसग्गे अप्पा भावेतव्वो, कुमग्गसिता य जाणिउं पडिहणेतव्वा, अतो चत्तारि समोसरणाणि, अथवा णामणिप्फण्णे वुत्तानि समोसरणाणि इमानीति वक्ष्यमाणाणि, प्रवदंतीति प्रवादिनो ते इमेत्ति, 'चत्तारि समोसरणाणि'सिलोगो ॥५३५॥ चत्तारित्ति संखा परवादिपडिसेधत्थं अंते चउण्ह गहणं, समवसरंति जेसु दरिसणाणि दिट्ठीओ वा ताणि समोसरणाणि, प्रवदंतीति प्रावादिका, पिधंपिधं वदंति पुढो वदंति, तंजहा–किरियं अकिरियं विणयं अण्णाणमाहंसु चउत्थमेव, तत्थ किरियावादीणं अत्थित्ते सति केसिंचि इयायाकतन्दुलमात्रः केसिंचि हिययाधिट्ठाणो पदीवसिहो धम्मो(वमोजीवो)किरियावादी कम्मं कम्मफलं च अत्थित्ति भणति, अकिरियावादीणं केइ णत्थि किरिया फलं त्वस्ति, केसिंचि फलमवि णत्थि, ते तु जहा पंचमहाभूतिया चउब्भूतिया खंधमेत्तिया सुण्णवादिणो लोगाइतिगा य वादि अकिरियावादिणो, अण्णाणिया भणंति–जे किर णरए जाणंति ते चेव तत्थुववज्जंति, किं णाणेणं तवेणं वत्ति. तेसु मिगचारियादयो अडवीए पुप्फफलभक्खिणो इच्चादि अण्णाणिया, वेणइया तु आ(दा)णामपणामादिया कुपासंडा, तत्थ पुव्वं–'अण्णाणिया ताव कुसलावि सत्ता' वृत्तं ॥५३६॥ अकुशला एव धम्मोवायस्स, असंथुता णाम ण लोइयपरिक्खगाणं सम्मता, सव्वसत्थबाहिरा मुक्का, वित्ति-

तिण्णिछिएणवि वितिगिच्छा गाम मीमांसा, तिण्णत्ति तीर्णा, णत्थित्ति तेसिं वितिगिच्छा अण्णाणित्तणेणं, अथवा ससमएवि ताव केसिंचि वितिगिंछा उप्पज्जति, किं तहिं परसमये ?, तं कतरेण उवदेसेण करेस्संति विचिकित्साऽभावं ?, जोऽवि तेसिं तित्थगरो तस्सवि सुत्तं, ण अत्थविचारणा, अथ अत्थि समयट्ठाणीत, एवं अकोविता, ण तं सयं अकोविदा, अकोविदानामेव कथयंति, को हि णाम विपश्चित् तान् अब्रवीत् जहा अण्णाणमेव सेयं अवद्धं कंमं च, अणाणुवीइत्ति अपूर्वापरतो विचिन्त्य यत्किंचिदेवा-सर्वज्ञप्रणीतत्वात् बालवत् सुसं वदंति, शाक्या अवि प्रायशः अज्ञानिका एव तेषामज्ञानोपचित्तं कर्म्म नास्ति, जेसिं च बालमत्त-सुत्ता अकम्मबद्धगा ते सव्व एव अण्णाणिया, सत्थधम्मता सा तेसिं जह चेव ठितेल्लगा तह चेव उवदिसंति, जहा अण्णाणेणं बंधो णत्थि, तह चेव ताणि सत्थाणि णिबद्धाणि 'सच्चं' (५३७) सव्वं मोसं इति चिंतयंता असाधुं साधुत्ति उदाहरंता सव्वंपि कताइ मोसं होज्जत्ति, एवं ते चिंतयंता सच्चंपि ण जाणंति, कथं ?, साधू दट्ठूण ण साधुत्ति भणंति, कयाइ सो साधु होज्ज कताइ असाधू, कयाइ चाउव्वओ कयाइ पावंचितो, चोरो वा कदाचि चोरः स्यात् कदाचिदचौरः, एवं स्त्रीपुरुषेष्वपि वैक्रियः स्यात् वेसकरणा वा योजइतव्वं, गवादिपु च यथासम्भवावस्थासु पुरुषादिपु च इत्येवं सर्वाभिशंकितत्वात् तदसाधुदर्शनं साधुत्ति ब्रुवते, साधुदर्शनं चासाध्वित्ति, अथवा सच्चं मुसंति इति भासयंता, जो जिणपण्णत्तो मग्गो समाधिमग्गो तमेते अण्णाणिया सच्चमपि संतं असच्चंति भणंति, अथवा सच्चो संयमो तं सत्तदसप्पगारा य असच्चं भणंति असंयममित्यर्थः, जहा ते किल भणंति तहा सच्चं भणंति, अणुवातो सच्चं, तं च कुदंसणमण्णाणवादं साधुंति भणंति, असाधू अण्णाणियं साधूत्ति भणंति, तच्छासनप्रतिपन्नांश्च असाधून् साधून् ब्रुवते, वुत्ता अण्णाणिया। इदाणीं वेणइयवादि, जेमे जणा वेणइया अणेगे, पुट्ठावि भावं विणियं-

सु णामा जेत्ति अणिद्दिट्ठणिद्देसे, जणा इति पृथग्जनाः, विनये नियुक्ताः वैनयिकाः, अनेगे इति बत्तीसं वेणइयवादिभेदा, ते पुट्ठा परेण अपिशब्दात् अपुट्ठावि **विणयिंसु भावंति** भावो नाम यथार्थोपलंभं विणयिंसु, तथा वा स्यात् अन्यथा वा, एवं ताव तेपां सत्यं भविष्यति, अथवा पुट्ठा वा–कीदृशो वा धर्म्मः ? इत्युक्ता ब्रुवते–सर्वथा परिगण्यमानः परीक्ष्यमाणः मीमांस्यमानो वा अयमस्माकं धर्म्मः, विणयमूलेण आरुहयधम्मगेण जणो णाधियो, कहं ?, जेण वयमपि विणयमूलमेव धम्मं पण्णवेमो, कथंचित्ते, येन वयं सर्वाविरोधेन सर्वविनयविनीताः मित्रारिसमाः, सर्वप्रव्रजितानां सर्वदेवानां च पुण्यं सत्कुर्म्मः, न च यथाऽन्ये वादिनः परस्परविरुद्धास्तथा वयमपि, अम्हं पुण पव्वइए समाणे जं जहा पासति इंदं वा खंदं वा जाव उच्चं पासति उच्चं पणामं करेति णीयं पासति णीयं पणामं करेति, उच्चमिति स्थानतः ऐश्वर्यतः तमुच्चं रायाणं अण्णतरं वा इस्सरं दट्ठूणं प्रणाममात्रं कुर्म्मः, णीयस्स तु साणस्स वा पाणस्स वा णीयं पणामं करेति, भूमितलगत्तेण सिरसा प्रह्वाः प्रणमामहे, त एवं तालिशाः **'अणोपसंखा इति ते उदाहु'** वृत्तं (५३८) संखा इति णाणं, संखाए समीवे उपसंखा, अणउपसंखा अज्ञाना इत्यर्थः, अनोपसंखया त एवमाहुः उदाहरेंतस्स उदाहुः **अट्ठे स ओभासति**, अर्थो नाम सत्यवचनार्थः, **ओभासति** उद्भवित्ति प्रगासति, एवं चेतसि नः प्रकाशयतीत्यर्थः, एवं च समीक्ष्यमाणं सत्यवचनं स्याद्, अन्यथा तु तथा चान्यथा च भवति, अथवा **अट्ठे स नो भासतित्ति** अर्थो नाम धर्मोऽर्थ एवं चेतसि नः प्रभासयति एवं च प्रकाशयति एवं दृश्यते युज्यमानः, आर्हतधर्म्मो ण, किल ज्ञानभासितेण तु सेसेहिं अण्णाणियकिरियावादिहिं घडते, कहं ?, जेण ते जात्यादिरागद्वेषाभिभूता तेण ण तुल्लोऽवभासति, भणिता विणईया। इदाणिं अकिरियवादीदरिसणं **'लवावसक्की य अणागतेहिं'** लवमिति कर्म, वयं हि लवात् कर्मबन्धात् अवसक्कामो–फिट्टामो

अवमराम इत्यर्थः, संववहारबंधेणावि ण बज्झामो, किं पुण णिच्छयतो, उपचारमात्रं तु तद्यथा 'बद्धा मुक्ताश्च कथ्यन्ते, मुष्टिग्रन्थिकचोतकाः। न चान्ये द्रव्यतः संति, मुष्टिग्रन्थिकपोतकाः ॥ १ ॥' ते हि वातूलिकाः शाक्यादयः आत्मानमेव नेच्छंति, किं पुनस्तद्बधं इति, **अणागतेत्ति** कालग्रहणात् अनागतेऽपि काले न वध्यन्ते, चग्रहणाच्चातिक्रान्तवर्त्तमानयोः, अथवा **विसक्किति** क्षणलवमुहूर्तअहोरत्तपक्षमासर्त्वयनसंवत्सरादिलक्षणे काले सर्वत्र कर्मबन्धादवशङ्कुमः, लवः कालः, वर्तमानादवसक्कामो, एवमनागतादपि, एतद्दर्शनः मिच्छत्तकिरियामाहंसु–आख्यातवंतः, के ते?, अकिरियओ आता जेसिं ते इमे अकिरियाता, ते नापि कारकमिच्छंति नापि करणानि, येषामपि करणानि कित्तीणि आत्माकर्ता, तेऽपि अक्रियावादिनः, उक्तं हि–'कः कंटकानां प्रकारोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां वा। स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारात् स्ववशो हि लोकः ॥१॥ तेसामुत्तरं–गंता च नास्ति कश्चिद् गतयः पड् बुद्धशासनप्रोक्ताः। गम्यत इति च गतिः स्यात् श्रुतिः कथं शोभना वह्वी? ॥ १ ॥ क्रिया कर्म्म कृतं न वास्ति, असति कारके कुतः कर्म्म?' कथं च पड् गतयः, अंतराभावे वा, यथाऽस्माकं 'विग्रहगतौ कर्मयोगः' एवं तेषामपि अन्तराभावः, एवं ते पुट्ठा वा अपुट्ठा वा सम्मिस्सभावं ब्रुवते, अबंधानि च कर्माणि पण्णवंति, एवं **जातकशतान्युपदिशंति** बुद्धस्य, तानि शून्यत्वे न युज्यंते, तथा—'मातापितरौ हत्वा बुद्धशरीरे च रुधिरमुत्पाद्य। अर्हद्वधं च कृत्वा स्तूपं भित्त्वा च पश्चैते ॥ १ ॥ आविर्हिं नरकं याति' एतच्च न युज्यते, जातिजरामरणानि च न स्युः, उत्तमाधममध्यमत्वं न स्यात्, मनुष्यतिर्यग्योनीनां स्वयमेव कर्म्माविपाको, जीवस्य कर्तृत्व कर्मावद्धं च कथयंति, चौरादीनां च कर्मणामिहैव विपाकं दृष्ट्वा सामान्यतोदृष्टेनानुमीयते कृतकर्त्ताऽयमात्मा, येनास्य गर्भगतस्यैव व्याधयः प्रादुर्भवन्ति मृत्युश्च, तथा च सामान्यतोदृष्टेनानु-

मानेन, संमिश्रभावो नाम असतित्वमपि प्रतिपद्यमानाः अस्तित्वमेव दर्शयंति, तमेव सन्मिश्रभावं यथा गिरया गृह्यंते, निगृह्यन्त इत्यर्थः, उम्मत्तवादं वदंति, तद्यथा–कश्चिदुन्मत्तः स्वाभाविकं ब्रवीति चेष्टते वा, क्वचिदन्यथा, अंधो वाऽध्वानं व्रजेत् क्वचित् अपथा गच्छति, एवं तेऽपि गन्धर्वनगरतुल्याः मायास्वप्नोपनतधनसदृशाः मृगतृष्णानिद्रामदप्रनर्तितालातचक्रसमाः एवमपि निश्चयाभावात्, भावानुक्त्वा पश्चाज्जातिस्मरणानि जातकान् निरन्वयाश्रयं निर्वाणं च प्रतिपद्यन्ते, एवं ते संमिश्रभाववादिनः मिथ्यादर्शनान्धकाराः जातकानेतस्यां गिरि गृहीता, यदि शून्यं कथं जातकानि ?, कथं स्मरणं ? कथं शून्यता ?, किंच–यदि शून्यस्तव पक्षो मत्पक्षनिवारणं कथं भवति ?। अथ मन्यसे न शून्यस्तथापि मत्पक्ष एवासौ ॥१॥ अस्तित्वात् तस्य, किंच–केन शून्यता देसिता ? किमर्थं देशिता स्याच्निष्पयोजना शून्यता इत्यादिभिः कर्कशहेतुभिश्चोदिता कच्छाघरघरियाए आहतियाए एलमूगो वा मम्मणमूगो वा, जहा मुंमुएति, णो एकं अणेकं वा पक्खं अणुवदंति अस्ति नास्ति वा, यद्यप्यष्टौ व्याकरणानि पठंति, ते पुण अकिरियावादिणो दुविधं धम्मं पन्नवेंति, तंजहा–इमं दुक्खं इमं एगपक्खं तावत्, अविज्ञानोपचितं १ परिज्ञानोपचितं २ ईर्यापथं ३ स्वप्नान्तिकं ४ च चतुर्विधं कर्म चयं न गच्छति, एतद्धि एकपाक्षिकमेव कर्म भवति, का तर्हि भावना ?, क्रियामात्रमेव, न तु चयोऽस्ति, बन्धं प्रतीत्याविकल्प इत्यर्थः, एगपक्खियं दुपक्खियं तु, यदि सत्त्वश्च भवति सत्त्वसंज्ञा च संचिन्त्यैव जीविताद् व्यपरोपणं प्राणातिपातः, एतत् इह च परत्र चानुभूयते इत्यतो दुपक्खिकं यथा चौरादयः, इह दुक्खमात्रामनुभूय शेषं नरकादिष्वनुभवंति, किंच–आहंसु छलायतणं च कम्मं षडायतनमिति षड् आयतनानि यस्य तदिदं आश्रवद्वारमित्यर्थः, तद्यथा–श्रोतायतनं यावन्मनआयतनं, 'त एवमक्खंति' वृत्तं ॥५४०॥ अक्रियाअण्णाणिआयभानं अबुज्झमाणा इह मिच्छत्तप-

लोच्छणा अप्पाणं परं वा तदुभयं वा वुग्गाहेमाणा **विरुवरूवाणि** दरिसणाणि, कथं?, दाणेण महाभोगा देहिनां सुरगतिश्च शीलेन। भावनया च विमुक्तिरित्यादि, किंच–यश्च वेदान्तश्च के ब्राह्मणे दधात्, यो वा विहारं कारयति, किंच—'एगपुप्फपदाणेण, आसीतिः कल्पकोटयः। सुखिनस्तिष्ठंति, एवमकिरिओ आता जेसिं ते होंति अकिरियाता, **जमादितित्ता मणुस्सा** जमित्यनिर्दिष्टस्य निर्देशः, आदिइत्ता गृहित्वा, स्वयं अन्यांश्च गाहित्वापि अणादीयं अणवदग्गं संसारं भमंति, किञ्चान्यत्, यदि सर्वमक्रियं तेन कथमादित्यः उत्तिष्टति? अस्तं वा गच्छति?, कथं वा चन्द्रमा वर्द्धते हीयते च?, न वा सरितः प्रस्यन्देरन्, न वा वायवो वायेयुः, सर्वसंव्यवहारोच्छेदः स्यात्, एवमुक्ताः ब्रुवते–'**णातिचो उट्ठेति ण अत्थमेई**'ति वृत्तं ॥ ५४१ ॥ आदित्य एव नास्ति, कुतस्तर्हि तदुत्थानमस्तमनं वा?, मृगतृष्णिकासदृशं तु एतदिति लोहितमर्कमंडलमवभासते, एवं चन्द्रमापि नास्ति, कुतस्तर्हि वृद्धिह्रासोत्थानास्तमनानि?, किंच–संघातो मरीची उट्ठेति, उट्ठो णासेणं इमं लोगं तिरियं करेति, करेत्ता सेणं इमं लोगं उज्जोवेति पभासति, न सरितोऽपि ण संदंति, न च न वायवः, ततः कथं न संदिष्यते वास्यंति वा?, स्याद् बुद्धिः–उत्तिष्ठन्नादित्यो दृश्यते अस्तं च गच्छन्, यतः पूर्वस्यां दिशि दृष्टः अपरस्यां दिशि दृश्यते, तेन क्रियावान्, देवदत्तस्य हि गतिपूर्विकां देशान्तरप्राप्तिं दृष्ट्वा चन्द्रादित्यावनुमीयेते, सरितश्च स्यन्दमाना दृश्यन्ते, वायवश्च वृक्षाग्रकंदादिभिरनुमीयते क्रियावंत इति, तच्चासत्, कथं?, गतं न गम्यते तावत्, अगतं नैव गम्यते। गतागतविनिर्मुक्तं, गम्यमानं न गम्यते ॥१॥ एवमयं वंध्यो लोकः, वंध्यो नाम शून्यः, अथवा वन्ध्यावत् अप्रसवत्वाद्वन्ध्यो, लोकायतानां हि न मृतः पुनरुत्पद्यते, एतावानेष परमात्मा, त एवं दर्शनं भावयंति, गलागत्यमपि कुर्वाणा नोद्विजन्ते, मातरं भगिनीं वा गत्वा नानुतप्यंते, येषां बंधाभाव एव ते कथं पापेभ्यो निर्वर्त्स्यन्ते?

निवृत्तिमूलं वा धर्म्मं देक्ष्यन्ते ?, एवं शाक्या अपि एवं वन्ध्याः, नितिओ गाम नित्यकालमेव शून्यः, शून्यं वा न चोच्छिद्यते, कसिणो नाम गृहनगरपर्वतद्विपदचतुष्पदादि सर्वो वन्ध्यः, त एवं विद्यमानमपि लोकं न पश्यंति, दृष्टान्तः–'जहा य अंधे सह जोतिणावि' वृत्तं ॥५४२॥ यथेति येन प्रकारेण, द्योतयतीति द्योतिः आदित्यश्च चन्द्रमाः प्रदीपो वा, द्योतिना सह सहद्योति नानादिरूवाणि घडादीणि, न पश्यन्ति, जग्गतोऽपि वर्तमानानि स्पर्शनापि न तेषां वर्णादिविशेषं पश्यन्ति, नयतीति नेत्तं हीने यस्य नेत्रे स भवति हीननेत्रः, उद्धत्ते उपहते वा संतं तु ते एवं अकिरियाता संतमिति विद्यमानं, तु पूरणे, अकिरियावाइणो, अकिरिओ मिच्छत्तोदयान्धकारात् जीवादीन् पदार्थान्न जानंति, अथवा किरियं न ते पस्संतित्ति क्रियावत्तां द्रव्याणां आगमनगमनाद्याः क्रियाः पश्यन्तोऽपि न पश्यन्ति, स्वयं क्रियासु वर्तते उंघवत्, न चैताः न पश्यन्ति, निरुद्धा येषां प्रज्ञाः ते भवन्ति निरुद्धपन्ना णाणावरणोदयेन, अथवा ते वराकाः कथं ज्ञास्यंति ये आगमज्ञानपरोक्षा एव ?, जे पुण ण निरुद्धपन्ना ते प्रत्यक्षेण वा आगमेन परोक्षेण जीवादीन् पदार्थान् यथावज्जानंति, तत्रावधिमनःपर्यायकेवलानि प्रत्यक्षं, मतिः श्रुतिः परोक्षं, प्रत्यक्षज्ञानिनस्तावत् जीवादीन् पदार्थान् करतलामलकवत् पश्यन्ति, समत्तसुतणाणिणोवि लक्षणेण, अट्ठंगमहानिमित्तपारगा अर्थं च साधवो जाणंति णिमित्तेणं, 'संवच्छर सुमिणं लक्खणं च'वृत्तं ॥५४३॥ संवत्सरनिमित्ते इमे एगट्ठिया, तं०- संवच्छरोत्ति वा ओतिसेत्ति वा, सुमिणं सुविणं ज्झाया व, लक्खणं सारीरं, एतेण चेव सेसयाइंपि सूइताइं, तंजहा–भोमं १ उप्पातं २ सुमिणं ३ अंतरिक्खं ४ अंगं ५ सरं ६ लक्खणं ७ वंजणं ८, णवमस्स पुव्वस्स ततियातो आयारवत्थुतो एतं णीणीतं, एतं बहवे अधिजिता, एवं अट्ठंगं णिमित्तं बहवे समणा अधिजिताण 'सव्वलोगंसि जाणंनि अणागताइं' अतिक्रान्तवर्त्तमानानि च, केवलिवद्वा

करेति तथा गताणित्ति, तथा भूताणित्ति यथावस्थितानीत्यर्थः, अंगवज्जानां अनुष्टुभेन छन्दसा अर्द्धत्रयोदशशतानि सूत्रं तावदेव शतसहस्राणि परिपातिका, अङ्गस्य तु अर्द्धत्रयोदशमहस्राणि सूत्रं, तावदेव सयसहस्राणि वृत्तं, अपरिमितं वार्तिकं, एवं निमित्तमप्यधीत्य न सर्वे तुल्याः, परस्परतः षट्स्थानपतिताः, चोद्दसपुव्वीवि छट्ठाणपडिता, एवं आयारधराणि छट्ठाणवडिया, यतश्चैवं तेनापदिश्यन्ते 'केई निमित्ता तधिया भवंति' वृत्तं ॥५४४॥ केचिदिति न सर्वे, अभिन्नदसपुव्विणो हेट्ठेण एतं अट्ठगंपि महाणिमित्तं अधितुं गुणितुं वा, अधीत्य एवमेव केचित् परिणामयंति, ते पडुच्च ते णिमित्ता तधिया भवंति, केई पुण निमित्तवुद्धित्वात् विशुद्धिणेमित्तकेहिंतो छण्हं ठाणाण अण्णतरं ठाणं परिहीणा अविशुद्धखयोवसमा 'विप्पडिएन्ति णाणं' विपर्यासेन एंति विप्पडिएन्ति, 'इक् स्मरणे' 'इङ् अध्ययने' 'इण् गतौ' एषां त्रयाणामपि इगिङीणां परिपूर्वाणां अप्रत्ययान्तानां विपर्यय इति पूर्वरूपं भवति, विपर्ययेण एति विप्पडिएति, को अर्थः?—विपर्ययज्ञानं भवति, असम्यगुपलब्धिरित्यर्थः, सपरिभवमप्यङ्गमधीत्य, अब्भपडलदिट्ठंतेणं, यथा श्लक्ष्णाभ्रपडले कश्चिद्वेत्ति एकमेवेदं अभ्रपडलं यावत्तत्रान्यदप्यस्ति सूक्ष्ममिति नोपलभ्यते, संजतावि केई विप्पडिएन्ति णाणं, किमंग पुण अण्णउत्थिया दगसोयरिया तव्वणिगादयो, ते विज्जाभासं अणधिज्जमाणा अणधिज्जमाणेत्ति अधीतेन निमित्तेण दुरधीतेन वितथं दृष्ट्वा निमित्तं वदंति, णिमितमेव णत्थि, तद्यथा—कश्चित् क्षुते त्वरितत्वात् सङ्कित एव गतः, तस्य चान्यः शुभः शकुन उत्थितः येनास्य तत् क्षुतं प्रतिहतं, स चेत् न तं शकुनं वेद शकुनोऽपि वा न लक्षितः स तु मन्यते व्यलीकमेव निमित्तं, येनाशकुनेऽपि सिद्धिर्जाता इति, एवं शोभनमपि शकुनं उत्थितमन्येनाशोभनेनप्रतिहतमनवबुद्ध्यमानः कार्यसिद्धिनिमित्तमेव नास्तीति मन्येत, अपरिणामयन्, विज्जाहरि(भा)से णाम यथार्थोपलम्भः, विद्यया स्पृश्यते विद्यया-

ऽऽप्यते, विद्यया गृह्यत इत्यर्थः, त एवं वराकाः चक्षुर्ग्राह्यमपि णिमित्तमपरिणामयन्तः आहंसु विज्जाए पतिमोक्खमेव निमित्तविद्यापरिमोक्षं, एवं हि कर्त्तव्यं, नाधीतव्यानि निमित्तशास्त्राणीत्यर्थः, किंचित्तथा किंचिदन्यथेतिकृत्वा मा भून्मृषावादप्रसङ्गः, बुद्धः किल शिष्याणामाहूयोक्तवान्—द्वादश वर्षाणि दुर्भिक्षं भविष्यति, तेन देशान्तराणि गच्छत, ते प्रस्थितास्तेन प्रतिसिद्धाः सुभिक्षमिदानीं भविष्यति, कथं ?, अद्यैवैकः सत्त्वः पुन्यवान् जातः, तत्प्राधान्यात्सुभिक्षं भविष्यति, इत्यतो निमित्तं तथा चान्यथा च भवतीतिकृत्वा आहंसु विज्जाए पलिमोक्खमेव, उज्झनमित्यर्थः, मोक्षं च प्रति निरर्थकमित्यतः निरुत्सृष्टं, अथवा विज्ञया परिमोक्खमाहु, सांख्यादयो ज्ञानात् मोक्षमिच्छन्ति, जे णिमित्तं संखाणं परिज्ञाणमियन्ति न ते किलात्यन्तपरोक्षमात्मानं परलोकं मोक्षं च ज्ञास्यन्ति ? इत्यादि हास्यं, पच्चल्लं कम्मं बंधंति ते सुत्तणाणहीलणाए, उक्तं हि—ज्ञानस्य ज्ञानिनां चैव, निंदाप्रद्वेषमत्सरैः। उपघातैश्च विघ्नैश्च, ज्ञानघ्नं कर्म बध्यते ॥ १ ॥ स्याद्बुद्धिः—केनैतानि समोसरणानि प्रणीतानि ? जं च हेट्ठा वुत्तं जं च उवरिं भणिहिति ?, उच्यते—अनिरुद्धपण्णा तित्थगरा ते एयमक्खन्ते 'समेच्च लोगं' वृत्तं ॥ ५४५ ॥ ते इति तीर्थकराः, एतदिति यदतिक्रान्तव्यं च परसमयसिद्धपरूवणाओ वा, एवमन्येऽप्याख्यातवंतः आख्याइस्संति च, सम्यक् इत्वा समिच्च ज्ञात्वेत्यर्थः, तथागता **समणा माहणा य** तथागत इति तीर्थकरत्वं केवलज्ञानं च गताः, पठ्यते च—**तहा तहा समणा माहणा य**, तथा तथेति यथा यथा समाधिमार्गव्यवस्थिताः तथा तथा ख्यान्ति त्रैकाल्यात्, जे अभिग्गहियमिच्छादिट्ठी जे अ अणभिग्गहियमिच्छादिट्ठी तेसिं सव्वेसिं दर्शनमाख्यान्ति, समणा माहणा यत्ति एगट्ठं, पच्चक्खणाणिणो परोक्खणाणिणो वा आगमप्रामाण्यात्, किमाख्यान्ति ? अत्थि माता अत्थि पिता जाव सुचिण्णा कम्मा सुचिण्णफला भवंति, एवं क्रियावादित्वं ख्याप्यते, किंच—'सयं

कडं णण्णकडं च दुक्खं सयं कडं णाम स्वयं कृतं सयं कडं, सव्वमेव हि कर्म्म दुक्खं, प्रतीकारात्पुण्यमपि दुक्खं, उक्तं हि–'तौ सव्वकालदुक्खौ' तं तु स्वयं कृतमेव, नान्यकृतं, न वाऽकृतं, आहंसु विज्जा चरणं पमोक्खं विज्जया चरणेण वा मोक्खो भवन्ति, न तु यथा सांख्या ज्ञानेनैवैकेन, अज्ञानिकाश्च शीलेनैवैकेन, उक्तं हि–'क्रियां च सज्ज्ञानवियोगनिष्फलां, क्रियाविहीनां च निबोधसंपदं। निरस्यता क्लेशसमूहशान्तये, त्वया शिवायालिखितेव पद्धतिः ॥ १ ॥' 'ते चक्खुजोगधरिस्सया(भूया उ सुहं पयाणं)गायगा' वृत्तं ५४६॥ चक्षुर्भूता लोकस्य, प्रदीपभूता इत्यर्थः, देशका गायकाः पगढगाः, मग्गं णाणातिहितं सुहं प्रजानां, तु विसेसणे, सन्मार्गगुणांश्च दर्शयति कुमार्गदोषांश्च, अथवा तु विशेषणे, अहितमार्गनिवृत्तिं च, प्रजायंतीति प्रजाः, तथा तथा सासयमाहु लोगो तथा तथेति येन येन प्रकारेण शाश्वतो लोको भवति पञ्चास्तिकायात्मकः अथवा यथाऽस्यात्मनः अव्यवच्छिन्नकर्म्मसंततिर्भवति यथाप्रकारा च तथा तथा सासतमाहु लोगे, तहा 'चउहिं ठाणेहिं जीवा णेरइयाउयत्ताए कम्मं पकरेंति०' तावत्संसारो नोच्छिद्यते यावन्मिथ्यादर्शनं, तीर्थकराहारकवर्जाः सर्व एव कर्म्मबन्धाः सम्भाव्यन्ते, उपलक्षणत्वादस्यान्यदपि यदत्र संभवति तत् द्रष्टव्यं, एवं रागद्वेषावपि संसारकरौ इतिकृत्वा तहा तहा वदति–संसारमाहुः, अहवा अतधा तथत्ति जस्स जारिसी सत्ता तहा तस्स उवचयो होति मिच्छा, अहवा मिच्छत्तअविरतिअण्णाणाणि जहा २ तहा २ संसारः, अथवा पाणवहादी जहा २ तहा २, अहवा कसायादयो जहा तहा, कायवाङ्मनोयोगा जहा २ तहा २ संसारो, सर्वत्र यात्रा परिमाणं वक्तव्यं, 'जंसी पया' यस्मिन्निति यत्र, प्रजायंते इति प्रजाः, सर्व एव सत्त्वा मानवा इत्यपदिश्यन्ते, मानवानां प्रजा मानवप्रजा, अथवा माणवा इति हे मानवाः!, संप्रसृताः संप्रगाढा ओगाढा विगाढा सम्प्रगाढा इत्यर्थः, एवं आश्रवलोके

कथयंति, आश्रवलोकानुरूपमेव च लोकं विशंति 'जे रक्खसा जे जमलोइया वा' वृत्तं ॥ ५४७॥ केपांचित् भवनपत्यादि देवा शाश्वताः तेण रक्खसगहणं , अथवा व्यन्तरा ग्रहीता राक्षसग्रहणात्, जमलोइयग्रहणाद्वैमानिकाः सूचिताः, गान्धर्वा व्यन्तराः एए जेणं जमदेवकाईया तिविधा, सर्वे ते जम्मस्स महारायस्स आणाउववातवयणणिद्देसे चिट्ठंति, असुरग्रहणेन भवनवासिनः सूचिताः, गान्धर्वा व्यन्तरा एव, ज्योतिष्का दृश्यन्त एव, सेसा आगासगामी य पुढोसिता य देवपक्खिवातादयः आगासगामी, पृथ्व्यंबुवनस्पतयः द्वित्रिचतुरिन्द्रियाश्च स्थलचरा जलचराश्च, एते पुढोसिता, पुनः पुनः विपर्यासमेनि विपर्यासो नाम जन्मनि मृत्युः, सर्व एव संसारे विपर्यासः, जेणं 'पुढविकायमइगओ उक्कोसं जीवो तु संवसे' 'जमाहु ओहं सलिलं अपारगं' वृत्तं, ॥५४८॥ यत् इत्यनिर्दिष्टस्य निर्देशे आह भगवानेव, द्रव्यौघः स्वयम्भुरमणः, स एवौघः सलिलः, ओघसलिलेन तुल्यं औघसलिलं तस्यापारं, जलचराः स्थलचरा वा न शक्नुवन्ति गंतुं णण्णत्थ देवेण महड्ढिएण इत्यतः अपारगः, जाणाहि णं जहा जिनैरुपदिष्टः आगमप्रामाण्यात् प्रत्यक्षतश्च उपलक्ष्यते मनुष्यादिसंसारः, चतुर्विधं भवग्गहणं २, कडिल्यमित्यर्थः, चउरासिति जोणिपमुहसयसहस्सगहणो जत्थ अणोरपारपविट्ठो सव्वद्धाएवि ण मुच्चति मिच्छादिट्ठी लोको, लोकाएतसुण्णवादिगादि लौकिक इत्यादि, दुमोक्षेति मिच्छत्तसातगुरुत्वेन च ण तरंति अणुपालेत्तए, जेवि अत्थिवादिणो किमंग पुण नास्तिकाः,जहा ताणि चत्तारि तावससहस्साणि सातागुरुयत्तणेण छक्कायवधगाइं जाताइं, 'जंसी विसण्णा विसयंगणादी' यत्र संसारे यत्र वा साकारधर्मे समाधौ कुमार्गे वा असत्समवसरणेपु, पंचसु वा विसएसु विसन्नाः, सुगरियान् स्पर्शः, तेष्वप्यंगनाः, तासु हि पंच विषया विद्यन्ते, तद्यथा–'पुप्फफलाणं च रसं' इत्यतः अंगणाग्गहणं, दुहतोवित्ति द्विविधेनापि प्रमादेन लोकं अमुं संचरंति, तंजहा–

लिङ्गवेससज्जाए अविरतीए य, अथवा आरंभपरिग्रहाभ्यां रागद्वेषाभ्यां वा त्रसस्थावरलोगाभ्यां इमं लोगं परलोगं वा, त एव मिथ्यात्वादिभिर्दोषैरभिभूताः अगत्समवसरणावस्थिताः **'ण कम्मुणा कम्म खवेंति बाला'** वृत्तं ॥५४९॥ न इति प्रतिषेधे, मिथ्यात्वादिषु कर्म्मबंधहेतुषु वर्त्तमानाः न कर्म्माणि क्षपयन्ति बालाः—कुतीर्थाः, यस्यैव हि ते भीतास्तमेवाविशंति, कर्मभीताः कर्मण्येव वर्द्धयन्ति, न निदानमेव रोगस्य चिकित्सा, यथा कश्चिन्मूढधीर्निदानैरेव रोगचिकित्सां करोति, स हि तस्य वृद्धिमाप्नोति, **अकर्मणा णु आश्रवनिरोधेन कर्माणि क्षपयंति धीराः** विधिक्रियाभिरिवामयान् वैद्याः, **मेधाविणो लोभमयं मेरा (मेहया)** धाविणो, लोभमतीताः, वीतरागा इत्यर्थः, एवं सायामतीता २ वा **संतोसिणोत्ति अलोभाः**, स्याद् बुद्धिः अलोभाः संतोषिणश्च एकार्थमितिकृत्वा तेन पुनरुक्तं, उच्यते, अर्थविशेषात् न पुनरुक्तं, लोभातीतः इति लोभमतिक्रान्तोऽलोभो वीतरागः, संतोषिण इति निग्रहपरमा अवीतरागा अपि वीतरागाः, **णो पकरेंति पावं संतोसिणो पयणुयं पकरेंति**, तब्भववेदणिज्जमेव, यत एव लोभा ईया अत एव संतोसिणः, एवं अमातिनः स्तोकमायिनः, त एव भगवन्तः अनिरुद्धप्रज्ञा **'ते तीअउप्पन्नअणागताइं'** वृत्तं ।.५५०॥ त इति तीर्थकरादयः प्रदीपभूताः, तीताणि लाभालाभसुखदुःखादीनि एवं पडुप्पन्नअणागताइं, जेहिं वा कम्मेहिं पुव्वकतेहिं इहायातो जोणिवासं पदं करेंति जं च भविस्सति इत्यतः तीतपच्चुप्पणअणागताइं, तहा भूताइं तहागताणि अवितहाणित्ति भणितं होति, न विभंगज्ञानिवत् विपरीतं पश्यन्ति, 'अणगारे णं भंते! मायामिच्छादिट्ठी रायगिहे नयरे समोहए' तेनावधिविभंगोपयोगेण,रायगिहे गतवं च वाणारसीए णयरीए रूवाइं जाणति जाव से से दंसणविवच्चासो भवति' ते भगवन्तः प्रत्यक्षज्ञानिनः, परोक्षे वा पूर्ववित्, **णेतारो अण्णेसिं अणण्णणेता**—णयंतीति नेतारः अन्येषां भव्यानां सर्वेषां नेतार इति, न अन्यस्तेषां नेता

विद्यते, एतावं ताव समणेण वा भम्मे अक्खाते इत्यतो अणण्णणेता, बुद्धा स्वयंबुद्धाः बुद्धबोधिता वा गणधराद्याः, अतं कुर्वन्तीत्यन्तकराः भवान्तं कर्मान्तं वा, ये वात्र भवान्तं न कुर्वंति तावत् 'ते णेव कुव्वंति ण कारवेंति' वृत्तं ॥ ५५१ ॥ स्वयं न कुर्वन्ति न कारयन्त्यन्यैर्नानुमन्यन्ते, किं तत् ?, पाणाइवातं, अनुक्तमपि विज्ञायते प्राणातिपातं, येनापदिश्यते भूताभिसंकाए दुगुंछमाणा भूतानि तसथावराणि ताणि यतो भिसं संकति सा भूताभिसंका भवति, हिंसेत्यर्थः, तां भूताभिसंकां तत्कारिणश्च जुगुप्समाना उद्विजमाना इत्यर्थः, पाणातिपातगिति वाक्यशेषः, लोकोऽपि हि मत्स्यबन्धादीन् हिंसकान् जुगुप्सते, एवं ते ण आमन्ति, ण भाषावेंति मुसावातं, एवं जाव मिच्छादंसणं ण परूवेंती णो सद्दहंति णयएण भेदेण, त एवमप्पाणं परं तदुभयं च संजममाणा सदेति सर्वकालं अव्रज्याकालादारभ्य यावज्जीवं ज्ञानादिषु त्रिविधं प्रणमंति पराक्रमंत इत्यर्थः, विदितु वीराः विज्ञाय धीरा भवन्ति, ज्ञानादिभिर्वा राजन्तीति वीराः, एके न सर्वे, पठ्यते च-विण्णत्ति वीरा य भवंति एके, विज्ञप्तिमात्रा वीरा एवैके भवन्ति, ण तु करणवीराः, स्यात् कैः करणभूतानि येषां संकितव्यं ?, उच्यते-'डहरे य पाणे' वृत्तं ॥ ५५२ ॥ डहरा सूक्ष्माः कुन्थ्वादयः सुहुमकायिका वा, वुड्ढा महासरीरा बादरा वा, ते डहरे य पाणे वुड्ढे य पाणे जे आतनो पस्सति सव्वलोगे आत्मना तुल्यं आत्मवत् यत्प्रमाणो वा मम आत्मा एतावत्प्रमाणः कुंथोरपि हस्तिनोऽपीति, अथवा 'जह मम ण पियं दुक्खं' एवं सव्वजीवाणं, डहराण वा महल्लाण वा 'पुढविक्काइए णं भंते! अक्कंते समाणे केरिसयं वेदणं वेदयंति ?,' सुत्तालावगो इत्यतस्तेऽपि ण अक्कमितव्वा ण संघट्टेयव्वा, ये एवं पश्यन्ति 'उवेहती लोगमिमं महंतं' वृत्तं, उवेहती उपेक्षते, पश्यतीत्यर्थः, उपेक्षां करोति, सर्वत्र माध्यस्थ्यमित्यर्थः, महान्त इति छज्जीवकायाकुलं अट्ठविधकम्मकुलं वा, बलिपिंडोवमाए महन्तो लोगो,

अथवा कालतो महंते अनादिनिधनः, अस्ति एके भव्या अपि ये सर्वकालेनापि न सेत्स्यन्ति, अथवा द्रव्यतः क्षेत्रतश्च भावतश्च नान्तः, बुद्धो नाम धर्मे समाधौ मार्गसमोसरणेसु च, अप्रमत्तः कायेपु जयणाए य, अथवा अप्रमत्तेपु असंजतेपु परिवएज्जासित्ति बेमि, अथवा बुद्धे अप्पमत्ते सुट्ठु परिव्वए। **'जे आतयो परतो यावि णच्चा'** वृत्तं ॥५५३॥ आत्मनः स्वयं तीर्थकरा जाणंति जीवादीन्, परतो गणधरादयः, अलं पर्याप्त्यादिषु, स द्विधाऽपि जानकः अलमात्मानं परांश्चेति, अकृत्यात् वा प्रतिषेधे यतितव्ये, इत्येवं तं ज्योतिर्भूतं तमिति तं उभयत्रातारं ज्योतयतीति ज्योतिः आदित्यश्चन्द्रमाः मणिः प्रदीपो वा, यथा प्रदीपो द्योतयति एवमसौ लोकालोकं ज्योततीति ज्योतिस्तुल्यः इत्यर्थः, **सततं आवसे**(सेवि)**ज्जासित्ति** जावज्जीवाए से(वे)ज्जा तित्थगरं गणधरे वा यो यस्मिन काले ज्योतिभूतः जे **'पादुकुज्जा'** य इत्यनिर्दिष्टः, प्रादुः प्रकाशके, ये प्रादुष्कुर्वन्ति धर्म्मं पूर्वापरतोऽनुचिंत्य, करतलामलकवत् लोकं दृष्ट्वा इत्यर्थः, अथवा अणुवीयिणितुं परममयं दर्शयति, धर्म्मं समाधिमार्गं समोसरणानि च, कीदृशाः पुनस्ते विधारितज्ञानिनः त्रैलोक्यदर्शिनः ?, उच्यते–**'अत्ताण जे जाणति जे य लोगं'** वृत्तं ॥५५४॥ आत्मानं यो वेत्ति यथाऽहमयातीति संसारी च, अथवा स आत्मज्ञानी भवति य आत्महितेष्वपि प्रवर्त्तते, अथवा त्रैलोक्य (काल्य) कार्योपदेशादात्मा प्रत्यक्ष इति, कृतवानित्यादि, येनात्मा ज्ञातो भवति तेन प्रवृत्तिनिवृत्तिरूपो लोको ज्ञात एव भवति, आत्मौपम्येन यथा ममेष्टानि, दृष्टेष्वर्थेषु प्रवृत्तिनिवृत्तिभावतः यथाऽस्तीति, अथवा आत्मौपम्येन परेष्वहिंसकः। किंच **'जे आगतिं जाणइ णागतिं च'** जे आगति जाणंति, कुतो मनुष्या आगच्छंति ? सत्तममहिणेरइया०, कैर्वा कर्म्मभिः कुत्र वा गच्छंति ?, तव्वेए, कुतोऽहमागतः गमिष्यामि वा ? अनागतिरिति सिद्धिः सादीया अपज्जवसिता, **जे सासत जाणइ असासयं वा'** सर्वद्रव्याणां शाश्वतत्वं द्रव्यतः

अशाश्वत्तत्वं पर्यायतः, चशब्दाच्च शाश्वताशाश्वतं वा, तंजहा–णेरइया दव्वट्ठयाए सासता भावट्ठताए असासता, अथवा निर्वाणं शाश्वतं, संसारिणस्तु संसारं प्रतीत्य अशाश्वता, जातिमरणं च जाणीते, औदारिकानौदारिकानां सत्त्वानां जातिः, एत्थ जोणीसंग्रहो भाणितव्वो, णवविधोऽवि तंजहा–"सचित्तशीतसंवृत्ता मिश्राश्चैकशस्तद्योनयः," सचित्ताचित्तसीतोष्णसंवृत्तविवृता एताश्च सेतराः, ओरालिएणं चेव मरणं, बंधानुलोम्याच्च यतोऽपवादं, इतरधा तु पूर्वः उपपातो वक्तव्यः, स तु नारकदेवानां, चयणं तु जोतिसियवेमाणियाणं, उव्वट्टणा भवणवासियाणं वंतराणं नेरइयाणं च, '**अधोवि सत्ताण विउवट्टणं च**' वृत्तं ॥ ५५५॥ जहा जहा गुरूणि कम्माणि तहा २ अधो विउद्दंति, विविधं उद्दंति विउद्दंति जातंते मियंत इत्यर्थः, सर्वार्थसिद्धादारभ्य यावदधोसप्तम्यां तावदधो वर्त्तन्ते, तत्रापि ये गुरुतरकर्माणः ते अप्रतिष्ठाने शेषेषु चोत्कृष्टस्थितयः, **जो आसवं जाणति** आश्रवान् रागादीन् प्राणवधादीन् पञ्च आरंभपरिग्गहौ च इत्याद्याश्रवास्तद्विधर्म्मा संवरः संयम इत्यर्थः, जाव निरुद्धजोगित्ति, 'यथा प्रकाराः यावन्तः, संसारावेशहेतवः। तावन्तस्तद्विपर्यासा, निर्वाणावेशहेतवः ॥ १ ॥ **दुक्खं च जो जाणति निज्जरं** वा दुक्खमिति कर्म्मबन्धः प्रकृतिस्थित्यनुभावप्रदेशात्मकः तदुदयश्च, निर्जरा नाम बन्धापनयः द्वादशप्रकारं तपो निर्जरा, सो धम्मं समाधिमग्गं समोसरणाणि य आख्यातुमर्हति, पठ्यते च–आइक्खेत्तुमरुहति **सो किरियावादं** एतानि मिथ्यादर्शनसमोसरणानि संसारकराणित्ति ज्ञात्वा क्रियावादी सम्यग्दृष्टिश्चारित्रवान् '**सद्देसु रूवेसु अमुच्छमाणो**' वृत्तं॥ ५५६ ॥ रागो गहितो एवं जाव फासेसु, **रसेहिं गंधेहि अदुस्समाणो** द्वेषः गृहीतः, एवं शेषेष्वपि इन्द्रियेषु 'सद्देसु० आभक्ष्यावएसु अ' **णो जीवितं णो मरणं** विपत्थए असंजमजीवितं, अणेगविधं पत्थए विपत्थए, ण वा परीसहपराइयं मरणं, णो विपत्थए, अथवा मा हु चिंते-

ज्जासि जीवामि चिरं, मरामि च लहुं, वलयं कुडिलमित्यर्थः, तत्र द्रव्यवलयं नदीवलयं वा संखवलयं वा, भाववलयं तु कर्म्मा चउसमोसरणं, कुडिलं तु मिच्छत्तं, वलयत्तएण मुक्को वलयादिविमुक्को हि, पठ्यते च–मायादिविमुक्के इत्यर्थः॥ **इति समवसरणाध्ययनं द्वादशं समाप्तं।**

